असन्निधानतो यत्र कस्यचिद्वस्तुनो परम् ॥
वस्तु रम्यमरम्य वा सा विनोक्तिरिति द्विधा ॥ ६३ ॥

अरम्यता यथा—

सम्यक्त्वरत्नशुद्धस्य विनोरुगुणवर्णनाम् ॥
क्षतिः काव्यस्य कदिशा शृण्वन्तु कविकुञ्जराः ॥ ६४ ॥

मतेन वा सम्यक्त्वेन वा भद्रपरिणामेन वा शुद्धस्य गुणवर्णनया विना काव्यसम्पदोऽशोभनत्वम् ॥ एतेन काव्यशोभामिच्छता कविना तादृशस्य राज्ञो गुणा वर्णनीया इति विधिरेव द्योतितः ॥ रम्यता यथा—

प्रकाशमाने भरताधिनाथे विना कलंकेन सुलक्ष्ममाजि ॥
कलाप्रपूर्णे जगति प्रसन्ने नमःस्थितोऽप्यिन्दुरभून्मनोज्ञः ॥ ६५ ॥

चक्रिणि प्रकाशमाने शशिनः कलंकेन विना रम्यता ॥

प्रस्तुतं वर्ण्यते यत्र विशेषणमुसाम्यतः ॥
अप्रस्तुतं प्रतीयेत सा समासोक्तिरिष्यते ॥ ६६ ॥

श्लिष्टविशेषणसाम्या साधारणविशेषणसाम्या चेति द्विधा ॥ क्रमेण यथा—

चक्रिरुचगुणारूढधर्मयुक्सुखगश्रिया ॥
आलिंगितोऽरिवर्गोऽगाद्भाव कमपि चेतसि ॥ ६७ ॥

विभ्रमविलासशीलादिगुणस्वभावयुक्तसौख्यप्रापणलक्ष्म्याश्लिष्टाः रिपवः स्वेदानंदाश्रुदृष्टिनिमीलनादिभावमगुरित्यप्रस्तुत मौर्व्यारूढधनुःप्रयुक्तशोभनबाणश्रिया शतच्छिद्राङ्कितांगा मूर्च्छादिभावमगुरिति प्रस्तुतोक्त्या प्रतीयते ॥

व्रीडानिद्राभिमानच्युतिगलदलपनार्द्राक्षितस्वेदबिन्दु-।
श्लिष्टांगं सस्तसर्वाभरणवरमहावस्त्रमाकम्पितांगम् ॥
निर्यद्बाष्पाम्बुमापास्खलनयुतिमदाभीभिरालिंगितास्ते ।
सद्योपाघुट्टनं श्रीनिधिपतिबलतस्तर्जिता रेमिरेऽरम् ॥ ६८ ॥

शृंगारभयानकसाधारणविशेषणबलादरीणां नायकत्वप्रतीतिः ॥ समासे द्वयोर्विशेषणविशेष्ययोः स्वीकाराभावात् श्लेषाभेदः ॥ इयमपि स्थितिः—

मन्दं यातुं गृहीतुं कचमधरसुधां पातुमामोदमातुं ॥
भातुं वक्षो विधातुं स्वभुजशुभमहापञ्जरे चाटु वक्तुम् ॥

अन्यां वृत्तिं च कर्तुं समरत पतिना चण्ड तस्मिन्मृगाक्ष्या ।
चन्धावर्ते गुमभे रतमुखजलधौ स्थीयते किंनु तूष्णीम् ॥ ६९ ॥

उक्तं च— उच्यते यदनुद्दिष्टस्य प्रतीतिजननक्षमम् ॥
सधर्मे यत्र वस्त्वन्यत्समासोक्तिरियं यथेति ॥
अन्यथोदितवाक्यस्य काका वाच्यावलम्बनात् ॥
अन्यथा योजनं यत्स्या वक्रोक्तिरिति कथ्यते ॥ ७० ॥
आसक्तो निर्भरत्वेन प्रियो मे वल्लभः सखि ॥
अन्य न्यूना प्रियोऽपि त्वं किं करोषि लघुं स्वकाम् ॥ ७१ ॥

त्वमपि प्रियः प्रकाशात् न्यूना न भवसि अतस्त्वय्यपि पतिरासक्त एव किमिति स्वकां लघुं करोषीति काका प्रतीतिः ॥

स्वभावमात्रार्थपदप्रवल्लृप्तिः । सा या स्वभावोक्तिरियं हि जातिः ॥
जातिक्रियाद्रव्यगुणप्रभेदा । नीचाङ्गनाश्वस्तसुतादिरम्या ॥ ७२ ॥
अङ्गना प्राङ्गणारम्भे धनक्रीडापरायणा ॥
घनाघनध्वनेर्भीताऽऽलिलिङ्गात्मपतिं दृढम् ॥ ७३ ॥
हुंभारवं वितन्वानाः कुर्वाणा वल्गनं गवाम् ॥
पुरो वत्सास्तुपृष्ठाग्रा गोकुले भान्ति चारवः ॥ ७४ ॥
यत्र प्रकाशितं वस्तु साम्यगर्भस्ततः पुनः ॥
कुतोऽपि च्छाद्यते व्याजात् सा व्याजोक्तिरितीर्यते ॥ ७५ ॥

श्रीभूमिपाणिग्रहकालजात- । रोमाञ्चवृन्दे सति चक्रयुदात्तः ॥
राजाऽभिषिक्ताम्बुकणप्रजः किं । कर्तव्य इत्यैक्षत मन्त्रिवर्गम् ॥ ७६ ॥

भूमिपाणिग्रहजनित रोमहर्षण धीरोदात्ततया भरतचक्रिणा महाभिषेका-म्बुकणव्याजेन प्रच्छादयता मन्त्रिणो वीक्षिताः ॥ व्याजोक्त्या किंचित्सा-म्यान्मीलनं कथ्यते—

वस्तुना मीलनं यत्र प्रच्छाद्येता-यवस्तुवत् ॥
सहजागन्तुकाभ्यां सतिरोधानाभिधो द्विधा ॥ ७७ ॥

वस्तुना वस्त्वन्तरं यत्र प्रच्छादितं स मीलनालङ्कारः ॥ स द्वेधा

न्तुकतिरोधानं आगंतुकेन सहजतिरोधानं चेति ॥ क्रमेण यथा—

श्रीमद्दिग्विजयाभिमुख्यवति सचक्रेश्वरे शत्रुषु ।
क्वापि त्रस्तवपुष्षु लीनतनुषु प्रध्वानकैर्दुन्दुभैः ॥
गम्भीरैः परिगर्जितेषु जनिताः कामज्वरालिङ्गिताः ।
शत्रूणामरुजोष्णतां न च विदन्त्यङ्गेषु रामामपि ॥ ७८ ॥

सहजेन रिपुवधूगतेन स्मरानलौष्ण्येन मार्गवशादागन्तुकं मरुभूमिजातो ष्णत्वं तिरोहितम् ॥

श्रीमच्चक्रेश्वरस्य प्रथितभुजमहातेजसाऽन्तर्मयानां ।
नित्यं स्वेदाश्रुकम्पाद्युपचयमपि सत्कामगोष्ठ्यां प्रजातम् ॥
प्रेम्णोद्भूतं भवेदित्यवधृतमतितो विश्वसन्ति स्म नारम् ॥
काम्याकृष्टिक्षमश्रीहसितयुतगुणश्रीकटाक्षा वधूव्यः ॥ ७९ ॥'

भयजातेन स्वेदादिना आगन्तुकेन सहजं प्रेमजातं स्वेदादिकं तिरोहितम्

वस्त्वन्तरैकरूपत्वं सामान्यालंकृतिर्यथा ॥ ८० ॥

भरतयशसि लोके जृम्भमाणेऽतिशुभ्रे ।
शशधररजताद्रिक्षीरवाराशिमुख्ये ॥
भुवि जननिरीक्ष्याऽदृश्यमानेऽद्भुताढ्या ।
प्रमदमुलपितास्याऽन्योऽन्यमस्मादतीद्धा ॥ ८१ ॥

यशसि जृम्भिते सति शशिप्रभृतीनां निर्मलवस्तूना गुणसाम्येन तदैकात्म्य । अन्यगुणसन्निधानातिशयसाम्यात्तद्गुणः कथ्यते—

विहाय स्वगुणं न्यूनं सन्निधिस्थितवस्तुनः ॥
यत्रोत्कृष्टगुणादानं तद्गुणालंकृतिर्यथा ॥ ८२ ॥
जिनांघ्रिनखरुक्कान्ध्या नम्रत्रिदशमौलयः ॥
पद्मरागमणिद्योताः शुभ्रिमाढ्यतमीकृताः ॥ ८३ ॥

तत्प्रतिपक्षोऽतद्गुण उच्यते ॥

यत्र सन्निधिरूपे तु हेतौ सत्यपि वस्तुनः ॥
नेतरस्य गुणादानं सोऽलंकारो ह्यतद्गुणः ॥ ८४ ॥

आदीनवानुदस्यन्नम्यपर्णगात्स्मनन्विषा ॥

लोके किं मीयते चक्रिकीर्तिः क्षीराब्धे न यात्यजम् ॥ ८५ ॥ !)

पुरजितस्य भुजपञ्जिकेशरित्यत्र कायप्रमाणारब्धिते जगति सर्वत्र व्याप्तस्य च-क्रियशसः स्वकीय एव यशनिमा जृम्भितः ॥ विरोधस्यातद्गुणेन किंचित्सा-रूप्यतस्तिरोप उच्यते ॥

यत्राभासतया पूर्वं विरुद्धत्वं प्रतीयते ॥
परिन्हीयेत पर्यन्ते विरोधालंकृतिर्यथा ॥ ८६ ॥
पाशुसिद्धैर्जात्याद्यैः स्वद्रैराश्रयरादयः ॥
जातिक्रियागुणद्रव्यविरोधे क्रमशो दश ॥ ८७ ॥

जातेर्जातिक्रियागुणद्रव्यैर्विरोधे चत्वारो भेदाः । क्रियायाः क्रियागुणद्रव्यैर्वि-रोधे त्रयो भेदाः ॥ गुणस्य गुणद्रव्याभ्यां सह विरोधे द्वौ भेदौ । द्रव्यस्य द्रव्येण सार्धं विरोधे एको भेदः ॥ एवं विरोधभेदा दश ॥

पद्माकरोऽपि चकोरो जडाशय इति स्मृतः ॥
जातेर्जात्या विरोधोऽयं श्रेयसेति निरूपितः ॥ ८८ ॥
धीरोऽपि न मीनाक्षीवाणाकार्यं निर्घृणः ॥
जातेः क्रियाविरोधोऽयं श्रेयसेति निरूपितः ॥ ८९ ॥
धीरोऽपि स्थाणोरा स्याच्छ्वानानीति वेदितः ॥
जातेर्गुणविरोधोऽयं श्रेयसेति निरूपितः ॥ ९० ॥
गजाकरोऽपि सन्मार्गी भवतान्हृदयसंभूतः ॥
जातेर्द्रव्यविरोधोऽयं श्रेयसेति निरूपितः ॥ ९१ ॥

सन्मार्गस्य मानस्यसंभूतत्वेन द्रव्यत्वं कथंचित ॥

तत्त्व सत्त्वादिना येन नैकेनाप्यवधारितम् ॥
तद्वित्तवाप्यमांत्र स सुपार्श्वोऽस्तु मे गुरुः ॥ ९२ ॥

सत्त्वादिना अस्तित्वनास्तित्वादिना धर्मेण एकेनापि नावधारितं किंचिदपि न ज्ञातं तथापि तत्त्ववेदी सर्वथास्तित्वादिना न वेत्ति कथंचिदस्ति-त्वादिना जानातीति परिहारः ॥ अनिश्चयक्रियाया विरोधः ॥

विबुधेशविहारोऽपि गोत्रवात्सल्यमण्डितः ॥
क्रियायास्तु गुणेनात्र विरोधः श्लेषतो मतः ॥ ९३ ॥

इन्द्रविहारस्य पर्वतवात्सल्यमिति क्रियागुणयोर्विरोधः ॥ विबुधानां विदुषामीशोऽभीष्टदायी चक्री ॥

विकासमपि पद्मानां कुर्वन् राजा निधीश्वरः ॥
द्रव्येणात्र क्रियायास्तु विरोधः श्लेषतो मतः ॥ ९४ ॥

चन्द्रस्य परमतापेक्षयैकत्वे न द्रव्यत्वं ॥

रक्षिताऽपि त्वया राजन् भूमिः शुभ्रा बभूव भोः ॥
गुणेनात्र गुणस्यास्ति विरोधः कविसम्मतः ॥ ९५ ॥

रक्तत्वशुभ्रत्वयोर्विरोधः ॥

येषमतापयुक्तोऽपि कलानिधिरितिस्तुतः ॥
द्रव्येणात्र गुणस्यास्ति विरोधः कविभाषितः ॥ ९६ ॥
धर्मराजोऽपि चक्रेशो राजराज इति स्तुतः ॥
द्रव्येणात्र विरोधोऽस्ति द्रव्यस्य श्लेषतः स्फुटम् ॥ ९७ ॥

एवं दशधा विरोधो दर्शितः श्लेषाश्लेषाभ्यां च विचारणीयः ॥ अथ विरोधगर्भालङ्कृतयः कथ्यन्ते ॥ आधारं विना यत्राधेयं विरच्यते स एको विशेषः । एकमनेकविषयमिति द्वितीयो विशेषः ॥ प्रकृतस्याशक्यवस्त्वन्तरकरणमिति तृतीय इति विशेषालंकारस्त्रिधा ॥ क्रमेणोच्यते ॥

आधाररहिताधेयविशेषालंकृतिर्यथा ॥
पुरुमायाश्रिता मैत्री वाभाद्यात्रिगिरा चिरम् ॥ ९८ ॥

अष्टादीशस्य मार्चानसाधारभूतस्य परममुक्तिं गतस्य तिरोधानेऽप्याश्रितया उत्तरोत्तरकालवर्तिनयाभिभाषया सह स्थितिः ॥

एकस्यानेकधात्वे तु विशेषालंकृतिर्यथा ॥
चक्रमालोकेन सर्वत्र धावन्तिस्मारयो भयात् ॥ ९९ ॥

अत्र भयभ्रान्तानामरीणां सर्वत्र पुरोभागे पश्चाद्भागे पार्श्वयोरपि गृहस्य बहिरन्तर्वा धूलसङ्कुलभरतेश्वरदर्शनाद्धावनमिति एकोऽपि चक्री अनेकः प्रतीयते ।

अशक्यवस्तुनिष्पत्तिर्विशेषालंकृतिर्यथा ॥
चक्रिदृष्टः सुरेन्द्रोऽपि कृतार्थः किं जनः परः ॥ २०० ॥

चक्रिणः कृपाकोमलदृष्टिनिरीक्षितः शक्रोऽपि कृतार्थः । साधारणजनस्तादृ-शदृष्टः किम प्राप्नोतीति अशक्यवस्त्वन्तरकरणम् ॥

आधाराधेयवैचित्र्येणाधिकालंकृतिर्यथा ॥
यत्र नास्त्यनुरूपत्वमाधाराधेययोर्मता ॥ १ ॥
अधिकालंकृतिर्द्वेधा साधाराल्पबहुत्वतः ॥

ऊर्ध्वाधोमध्यभेदत्रिभुवनभीरता कीर्तिरार्द्राशसूनोः ।
स्वैरक्रीडां विधातुं निरुचिततनुश्च गूढमूर्त्या प्रवृत्ता ॥
इन्दुव्योमापगाभीहिमवदुरगगिरिक्षीरवाराशिमुख्यै- ।
स्तत्सान्द्रीभावरूपैः प्रकटिततनुका मर्त्यलोके रराजे ॥ २ ॥

अत्राधारस्य भूम्याकाशजठरस्याल्पत्वम् आधेयस्य चक्रियशसो विपुलत्वम् ॥

प्राच्योदीच्या प्रतीच्या स्वहितनृपतयो दाक्षिणात्याश्च सर्वे ।
हत्वश्वाद्धिप्रवेशेनाविभवगणसमाक्रान्तकाष्ठान्तराला ॥
निर्मर्यादे बले श्रीभरतनिधिपते क्षीरसिन्धूयमाने ।
लीना पूर्णत्वमापुर्न च बलजलधेरस्य कोणेऽपि विश्वम् ॥ ३ ॥

आधारस्य चक्रिसेनाकल्पवैपुल्यमाधेयानां प्राच्यादिराजसेनानामल्पत्वम् ॥

प्रसिद्धकारणाभावे कार्योत्पत्तिर्विभावना ॥
विशेषोक्तिस्तु सामग्र्यां सत्यां कार्यस्य नोद्भवः ॥ ४ ॥
चक्रिकीर्तिजलशृणामुत्पदेऽशादिदं तमः ॥
दिवसेऽपि तेजांसि नोद्भवन्त्यमी तदा ॥ ५ ॥

तिमिरोत्पादस्य प्रसिद्धस्य कारणस्य रात्रेः तदभावेऽपि तदुत्पत्त्युक्त्या अप्रसि-द्धहेतुना कीर्तिशोकादिना दिग्मूढत्वादिरूपस्य तमसः सद्भावात् । दिवसे किरणानां बाहुल्येऽपि तेजसामनुत्पाद इति विशेषोक्तिः । अत्रापि कोशद-ण्डधैर्यादिविरहोऽप्रसिद्धो हेतुरस्त्येव ॥ कार्यकारणविरोधवस्तुनोरसंग-तिरुच्यते —

कार्यकारणयोरेकदेशसंवर्तिनोरपि ॥
भिन्नदेशस्थितिर्यत्र तत्रासङ्गत्यलंकृतिः ॥ ६ ॥
धूर्यं चक्रिणि यद्गण्डमारं वहति सुभुजि ॥
राजानः शमितात्मानो बभूवुर्नतमौलयः ॥ ७ ॥
भारमन्यस्मिन्निधीशे बिभ्रति सति तदन्येषु रिपुषु नमनमिति ॥ वि
स्तुतेर्विचित्रमुच्यते—
स्वविरुद्धफलाप्त्यर्थमुद्योगो यत्र तन्यते ॥
विचित्रालंकृतिं प्राहुस्तां विचित्रविदो यथा ॥ ८ ॥
पुरोरग्रे त्रिलोकेशा मुमुचुः सम्पदोऽखिलाः ॥
सुनिर्बाधनमादातुमलिलाः सम्पदोऽनिशम् ॥ ९ ॥
अत्रादातुं त्यजन्तिस्मेति विपरीतफलप्राप्त्यर्थः प्रयत्नः ॥ विरोधमूलत्वा
न्मस्यान्योन्यं कथ्यते—
परस्परक्रियाद्वारमुत्पाद्योत्पादकत्वकम् ॥
यत्र सूरिभिरुक्ता सावन्योन्यालङ्कृतिर्यथा ॥ २१० ॥
पुरुणाऽऽरोहता मेरुं सिंहासनमलङ्कृतम् ॥
नानारत्नभृता तेन पुरुरप्यधिकां श्रियम् ॥ ११ ॥
जन्माभिषेकावसरे आरोहता नाभिशिशुना हेममयवपुषा सिंहासनं
तेनायमिति पुरुपीठयोरन्योन्यभूष्यभूषकत्वम् ॥ विरोधमूलं विषमं निरू
हेतोर्विरुद्धकार्यस्य यत्रानर्थस्य चोद्भवः ॥
विरूपघटना त्रेधा विषमालंकृतिर्यथा ॥ १२ ॥
कालेरगाभखड्गेन कीर्तिर्गोपमोदभूत् ॥
जयाशाऽऽस्तां द्विषो युद्धे चक्रवालेकात्पतन्त्यमी ॥ १३
नीलवर्णाद्युपेन गंगाशुभ्रं यशो जातमिति कारणाद्विरुद्धकार्योत्पत्तिर्वि
विषमालंकृतिः ॥ न केवलस्य रणोद्योगफलस्य जयस्य अनुत्पत्तिः
प्राणनाशरूपस्यानर्थस्योत्पत्तिरपीत्यकार्यभूतस्यानर्थस्योद्भवे द्वितीयं विष
निःशेषत्रिदशेन्द्रशेखरशिखारत्नप्रदीपावलि· ।

सान्द्रीभूतमृगेन्द्रविष्टरतटीमाणिक्यदीपावली ॥
केयं श्रीः क्व च निस्पृहत्वमिदमित्यूहातिगस्तादृशः ।
सर्वज्ञानदृशश्चरित्रमहिमा लोकेशलोकोत्तरः ॥ १४ ॥

सम्पृहत्तयोरन्यायाः श्रियो निस्पृहत्वस्य घटनमिति विरूपयोर्वस्तुनोस्संघट्टने तृतीयं विषमम् ॥

यत्रान्योऽन्यानुरूपाणामर्थानां घटना समम् ॥
सुभद्रा भरतेशस्य लक्ष्म्या सममभूद्वरा ॥ १५ ॥

लक्ष्मीसुभद्रादेव्योरनुरूपयोर्योग इति समालंकारः ॥ विषमपर्यन्तं विरोधगर्भालङ्कारा दर्शिताः ॥ विषमवैसादृश्यात्समगुम्फम् ॥ इदानीं गम्यमानौपम्यालंकारा उच्यन्ते ॥

केवलप्रस्तुतान्येषामर्थानां समधर्मतः ॥
यत्रौपम्यं प्रतीयेत भवेत्सा तुल्ययोगिता ॥ १६ ॥

केवलप्रकरणिकाणां यथा—

भाने निर्धाटस्य कीर्तयो द्विपदङ्गना ॥
नित्यभ्रान्तियुजो यान्ति भिनिमान प्रतिक्षणम् ॥ १७ ॥

यशसां त्रियोषितां च प्रस्तुतानां गमना यान्तीति समानधर्मं ॥ अन्येषां केवलाप्रस्तुतानां यथा

इन्द्रनागेन्द्र निशाकिर्भाद्विमद्दिन तुल्यवर्तिना ॥
चक्रिणा भ्रमताने ... निःसारता गताः ॥ १८ ॥

इन्द्रादीनामप्रस्तुतत्वेन ... निःसारता गता इति समानधर्मं । अत्र गम्यमानौपम्य ... । ... यामुनो निःसारता ... । इत्यर्थः तुल्ययोगिता ॥

नाकायेन्द्र ... ॥
निरस्यन्ते ... ॥ १९ ॥

तथा चोक्तः

उपमेयं समीकर्तुमुपमानेन युज्यते ॥

तुल्यैककालक्रियया यत्र सा तुल्ययोगिता ॥ २२० ॥
तमसा लुप्यमानानां लोकेऽस्मिन्साधुवर्त्मनाम् ॥
प्रकाशनाय प्रभुता भानोस्तव च दृश्यते ॥ २१ ॥ इति

सामस्त्ये प्रस्तुतान्येषां तुल्यधर्मोऽत्र प्रतीयते ॥
औपम्यं दीपकं तत्स्यादादिमध्यान्ततस्त्रिधा ॥ २२ ॥

प्रस्तुताप्रस्तुतानां समस्तानामेव यत्र समधर्मयोगेनौपम्यं तद्दीपकम् ॥

भात्यधोविष्टपे नागराजः स्वर्गे सुरेश्वरः ॥
आनन्दमन्दिरे क्षेत्रे भरते भरतेश्वरः ॥ २३ ॥

पद्यादिवर्तिनो भातीतिपदस्य प्रत्येकमभिसम्बन्धादादिदीपकम् ॥

मौक्तिकैरब्धिर्भाति ज्वलत्तेजोभिरंशुमान् ॥
हीनैः किरणैरिन्दुः स्वगुणैर्भरतेश्वरः ॥ २४ ॥

मध्यदीपकम् ॥

ज्योत्स्नया रम्यया चन्द्रः मुद्रया महाम्बुधिः ॥
सजेन्द्रो दिव्यया चक्री कान्त्या चारु विराजते ॥ २५ ॥

अन्त्यदीपकमिदम् ॥ श्लोकत्रयेऽत्र यथासंख्यौपम्यं गम्यते ॥ क्वचि-
त्सामान्येऽपि दीपकं यथा

कैलासाद्रौ मुनीन्द्रः पुरुरपदुरितो मुक्तिमाप प्रपूतः ॥
चम्पायां वासुपूज्यस्त्रिदशपतिनुतो नेमिरप्यूर्जयन्ते ॥
पावायां वर्द्धमानस्त्रिभुवनगुरवो विंशतिस्तीर्थनाथाः ।
सम्मेदाद्रौ प्रजग्मुर्ददतु विनमतां निर्वृतिं नो जिनेन्द्राः ॥ २६ ॥

इदमलङ्कारद्वय पदार्थद्वयगतम् । अधुना वाक्या[illegible]
निरूप्यते ॥

वाक्ययोर्यत्र सामान्यनिर्देशः पृथगुक्तयोः ॥
प्रतिवस्तूपमा साधर्म्याद् द्वेधाऽन्वयान्यतः ॥ २७ ॥

पृथगुक्तवाक्यद्वये यत्र वस्तुभावेन सामान्यं निर्दिश्यते तद्धर्मसाम्येन सा-
धर्म्या प्रतिवस्तूपमा । अन्वयव्यतिरेकाभ्यां सा द्विधा क्रमेण यथा—

अमरेश्वर एवैकः शक्तः स्वर्लोकपालने ।
भरतेश्वर एवैकः क्षमः षट्खण्डपालने ॥ २८ ॥
वृषभेश्वर एवैकः शक्तो भव्यप्रतोषणे ॥
सूर्याद्विना क्षमो नान्यः सरोजपरितोषणे ॥ २९ ॥

उभयत्र यथातथैवौपम्यं गम्यते ॥

पुरोर्बहुसुतेष्वेव चक्री भरत एव च ॥
किं ज्योतिषां गणः सर्वः सर्वलोकप्रकाशकः ॥ २३० ॥

उक्तं च--

अनुरागविशादीनां वस्तुनः प्रतिवस्तुना ॥
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ॥ ३१ ॥
बहुवीरेऽप्यपायेको यदुवंशेऽङ्गभुतोऽभवत् ॥
किं केतक्या दलानि स्युः सुरभीण्यखिलान्यपि ॥ ३२ ॥
वाक्ययोर्यत्र चेद्बिम्बप्रतिबिम्बतयोदितम् ॥
सामान्यं सह दृष्टान्तः साधर्म्येतरतो द्विधा ॥ ३३ ॥

वृक्षाश्चान्ये फलकुसुमगुणैः स्वाश्रितानामुपकारं ।
केचित् कुर्वन्तु कोऽपि स्फुटतरमहिमा कल्पवृक्षस्य दातुः ॥
सर्वाभीष्टस्य भूपाविभयवितरणं कुर्वता चक्रपाणेः ।
श्रीशान्तीशस्य रत्नप्रकरनिधिभृतः कोऽपि सम्पद्विशेषः ॥ ३४ ॥

कल्पशाखिचक्रिणश्च बिम्बप्रतिबिम्बभावादौपम्यं गम्यते ॥

पुरुभाग्योदयेनैव जाता सम्यक्त्वसम्पदः ॥
तावदब्जानि निद्रान्ति यावन्नोदेति भास्करः ॥ ३५ ॥

यथा भानूदयमात्रेण पद्मोन्मीलनं तथा पुरुजिनादित्यचन्द्रोदयमात्रेण सम्यक्त्वानि जातानि भव्यानामिति वैधर्म्येण बिम्बप्रतिबिम्बभावः ॥ वाक्यार्थयोरमुद्रानिष्पादितयोर्वस्तुनोरिव स्फुटे सादृश्ये प्रतिवस्तूपमा ॥ बिम्बप्रतिबिम्बयोरिव किंचित्स्फुटे तु दृष्टान्तः ॥ न हि बिम्बप्रतिबिम्बयोः स्फुटतरं सादृश्यं नियमेन परस्परविरुद्धादिकमुक्तत्वात् ॥ प्रतिबिम्बस्य हानो-

पादानयोग्यतारिहाय ॥ अथ गम्यमानौपम्यसत्तावान्निदर्शनेत्याह ॥

उपमानोपमेयस्थौ यत्रधर्मावसम्भवौ ॥
संयोज्याक्षिप्यते बिम्बक्रिया द्वेधा निदर्शना ॥ २६ ॥

उपमानोपमेयधर्मयोरुपमेयोपमानाभ्यामन्वयाभावादन्वयसम्बन्धार्थं प्रतिबिम्बकरणमाक्षिप्यते यत्र सा निदर्शना द्विधा । उपमानधर्मस्य निबद्धस्योपमेयान्वयेनासम्भवात्प्रथमा । उपमेयधर्मस्योपमानगत्वेनासम्भवाद्द्वितीया ॥ सा क्रमेणोच्यते ॥

सुमनोनिलयस्तुंगो मूर्धार्द्रो निर्धिधरः ॥
स्वमनोरनिष्व्यां स धत्ते श्रियं [illegible] ॥ २७ ॥

मेरोः शोभायाश्च [illegible]स्याद्विष्व्यां सदृशशोभां धत्तेति प्रतिबिम्बक्रियाः ॥

[illegible]निबिबकैरर्थैर्निधावन्यसम्भवः ॥
[illegible] ॥ २८ ॥

[illegible] प्रतीयते ॥

[illegible] ॥
[illegible] द्विधा यथा ॥ २९ ॥

[illegible]

[illegible] ॥
[illegible] ॥ ३० ॥

[illegible]

[illegible] ॥
[illegible] ॥ ३१ ॥

[illegible]

दर्शितोऽपि विलसद्गां सायं पश्यैव हि ॥
सत्यान्वितमभ्यस्ते न भेदो भविनो यथा ॥ ४२ ॥
विरुद्धस्येवार्थस्य दर्शनं यत्र दोषः स विरोधो यथा ॥
अन्तःपूरस्य शुद्धिं दर्शितोऽप्यसत्यतः ॥
द्विजिह्वोऽपि सदा देव लघुस्तुतिभूदितः ॥ ४३ ॥
यत्रोक्तस्य अविद्यमानत्वे मुद्रया सुखावाप्तिः ॥ दुर्नीतिविषमो यथा ॥
शाल्मल्योरपि नाभ्यर्णमारदैः पदैः ॥
निन्दुनाऽऽश्यो महाऽर्थो मान्य सर्वस्वं नगरम् ॥ ४४ ॥
विशेषणैर्विशेष्यस्य साभिप्रायैः कथ्यते ॥
विशेषणे साभिप्रायगुणे परिकरो यथा ॥
रूपयोर्हि परिकल्पनमहत्तेनुमुर्मा वधः ॥ ४५ ॥
परिकरे हि इन्दुमुख्यादि विशेषणं साभिप्रायम् ॥
विशेष्ये साभिप्राये तु मतः परिकराङ्कुरः ॥
चतुर्णामपुरुषार्थानां दाताऽसौ चतुर्भुज ॥ ४६ ॥
चतुर्भुज इति विशेष्यं चतुःपुरुषार्थदानेन साभिप्रायं परिकराङ्कुरः ॥
परिकरविषया किंचित् गूढत्वादुद्देशः ॥
वक्ष्यमाणोक्तयोर्यत्र निषेधाभासनं तथा ॥
विशेषप्रतिपत्त्यर्थं साऽऽक्षेपालङ्कृतिर्यथा ॥ ४७ ॥
उक्तविषये वस्तुनिषेधः कथननिषेधश्च वक्ष्यमाणविषये सामान्यप्रतिज्ञया विशेषनिषेधः । अतोऽभावावस्थानयनिषेध इत्याक्षेपश्चतुर्धा क्रमेण यथा ॥
धर्मेन्द्रराजसन्देशहरा न वयमीश्वर ॥
त्रिलोकीबान्धवे वक्ष्यामि किञ्चिदिति कथ्यते ॥ ४८ ॥
रिपुनृपतिभिरभिदर्शितवचोहराणामुक्तौ न वयं सन्देशहरा इति वस्तुनिषेधः । स च सन्देशः कर्णकटुवचनपदवचनपरिहारेण सत्यवचःपर्यवसानः । भोः सर्वलोकरक्षक त्वया ते राजानः शत्रवो नावलोकनीयाः ॥ किन्तु मे भृत्या इति पालनीया इत्यादिविशेषं सूचयति ॥

मां पाहि जिनेन्द्र [illegible] कथं रसि ॥
[illegible] त्रिलोकीरक्षके पुरी ॥ ४९ ॥

अत्र मां पाहि [illegible] कथननिषेधाभावनियमेन रत्नत्रय[illegible]
[illegible] विशेष आक्षिप्यते ॥

पृच्छामि [illegible] तवाग्रे पुरस्तेन भोः ॥
किं पृच्छ[illegible] [illegible] ॥ ५० ॥

पृच्छामीति कथन[illegible] विशेषकथननिषेधाभावानुत्तम[illegible]
[illegible] गम्यते ॥

[illegible] वयं देव [illegible] ॥
[illegible] बहुना [illegible] ॥ ५१ ॥

[illegible] इति [illegible] अनात्मा[illegible]
[illegible] ॥
[illegible] ॥ [illegible]
[illegible]

[illegible] ॥
[illegible] ॥

[illegible] ॥
[illegible] ॥

[illegible] ॥
[illegible] ॥
[illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible] ॥

यत्र द्विधा निगद्येत व्याजस्तुतिरियं यथा ॥ ५६ ॥

निन्दामुखेन स्तुतिर्यत्र सर्वत्रैव सा मता । स्तुतिमुखेन निन्दैव गम्यते यत्र सा द्वितीया व्याजस्तुतिरिति द्विधा प्रकीर्त्यते—

गङ्गे त्वदम्बुपानात् पुरुषो गीर्वाणः कथम् ॥
येन व्याजानिला पापिवैरिपुन्दं विदारितम् ॥ ५७ ॥
सत्यं स्वादुनिधिस्त्वं हि सागर गाढमिमा अहो ॥
हारितास्पृष्टिवर्णा सर्वाणि महाघाः प्रयान्त्यपि ॥ ५८ ॥

अप्रस्तुतप्रशंसा कथ्यते—

प्रकृतं यत्र गम्येताप्रकृतस्य निरूपणात् ॥
अप्रस्तुतप्रशंसा सा सारूप्यादेरनेकधा ॥ ५९ ॥

सारूप्यसामान्यविशेषभावात् कार्यकारणभावाच्च अप्रस्तुतप्रतीतिरप्रस्तुतप्रशंसा कारिकायामनेन पञ्चधाऽभिव्यक्तिः ॥ न च कार्यादेः कारणादिप्रतीतावनुमानान्तर्भावशङ्का द्वयोरपि गम्यगमकयोरनुमानालङ्कारे प्रकृतस्योपगमनात् ॥ एतेन पर्यायोक्तिरपि छिन्नेति ॥

धन्यासि कोकिले माध्वे गुम्फनादुपलक्षिते ॥
भाग्ये यत्कालनम्रे सहकारे गुणाधरे ॥ ६० ॥

अत्र कोकिलवृत्तान्तेनाप्रकृतेन सर्वासामाश्रयान्विहायानन्तगुणरत्नः पुरुषैक एव भव्यः सेव्य इति प्रकृतं गम्यते ॥ सारूप्यं तु—

भूपालकुञ्जराः श्रेष्ठाः शौर्यवैभवशालिनः ॥
येषां महती सृष्टिः सर्वमान्या प्रचक्षते ॥ ६१ ॥

यत्रिणो गुणमहत्वे प्रकृते नृपसामान्यविशेषवर्णनमिति ॥

अनन्तकामाऽपि न शृणुते द्रष्टुकामा न पश्यति ॥
स्प्रष्टुं न स्प्रष्टुकामाऽपि न कान्ता साऽवतिष्ठते ॥ ६२ ॥

मुग्धवर्णिना नूतनसङ्गमे महति लज्जेति सामान्ये प्रकृते विशेषात् सामान्यप्रतीतिः ॥

यैऽनेन इवेन्दुश्च निष्पादित—

भरतेशमहीनाथे शोभमाने भुवि स्फुटम् ॥ ६३ ॥

सूर्यादेस्तेजस्त्वादिभिः कार्यभूतैः कारणभूतं च प्रतापादि गम्य कार्यात्कारणप्रतीतिः ॥

भरतेशमहीभर्तुः कामधेनोरनर्घ्यम् ॥

स्थितां मयि दयादृष्टिं पश्यन् विस्मयसे कथम् ॥ ६४ ।

पूर्वं दरिद्रस्त्वमिदानीमीदृशैश्वर्यवान् कथं भवसीति कार्यं पृष्टवते गताय मित्राय कारणभूतचक्रिकृपादृष्टिरुक्तेति कारणात् कार्यस्य गम्यत्वमप्रस्तुतेः पर्यायोक्तं कथ्यते—

प्रस्तुतस्यैव कार्यस्य वर्णनात् प्रस्तुतं पुनः ॥

कारणं यत्र गम्येत पर्यायोक्तं मतं यथा ॥ ६५ ॥

शत्रूद्यानमहापक्वफलतृप्ताः क्षुधार्दयः ॥

चक्रिसेनाचरा युद्धे शान्ताः शौर्यादिशालिनः ॥ ६६ ।

रिपुपुरोद्यानपक्वफलानुभवेन चक्रिसेनाचरकृतेन कार्येण रणाङ्गणे स्वपुराणि त्यक्त्वा पलायिता रिपव इति कारणं गम्यते ॥

अभिधित्सितमुपमानस्य केमर्थक्याभिधायने ॥

तस्यापनेयता यत्र तत्प्रतीपं द्विधा यथा ॥ ६७ ॥

लोकोत्तरस्योपमेयस्योपमानाक्षेपो यत्र तदेकं । यत्र चोपमानस्योपमेयस्य कल्पना तद्विनीयमिति प्रतीपं द्विधा यथा ॥

त्रिलोकी द्योतयत्येना जिनेशे दिव्यभाषया ॥

निर्लज्ज किमुदेत्येष सहस्रकिरणोऽधुना ॥ ६८ ॥

गुणागुणपुञ्ज एवैष त्रिजगत्यपि दुर्लभः ॥

अस्त्यत्र कथमेतेन हेमाद्रिरुपमीयते ॥ ६९ ॥

अनुमानालङ्कार उच्यते—

साधनात्साध्यविज्ञानमनुमानमिदं यथा ॥

पदार्थवाक्यार्थगो हेतुः काव्यलिङ्गं मतं यथा ॥ २७० ॥

चन्द्रप्रभं नौमि यदीयभासा। नूनं जिता चान्द्रमसी प्रभा सा॥
नो चेत्कथं तर्हि तदङ्घ्रिलग्न-। मगच्छदन्यादिन्दुकुटुम्बमासीत्॥ ७१॥
इदमनुमानम्॥

प्रियमाणोऽपि भव्यौघः पुनरुज्जीवनं गतः॥
पुरुदेवप्रसादश्रीजीवनौषधपानवान्॥ ७२॥

मारणादिषोपद्रुतानां भव्यानां पुनरुज्जीवने पुरुजिनधर्मप्रणीतिरूपप्रसादजीवनौषधं हेतुः॥ पदार्थगतहेतुरिति काव्यलिङ्गमिदम्॥ तस्य विशेषणगतत्वेन पदार्थगतत्वम्॥

नमः सिद्धेभ्य इत्येवं शुभा पद्याक्षरावली॥
बिभ्रतो हृदि यो भव्या लोकाग्रपदमाश्रिताः॥ ७३॥

वाक्यार्थगतो हेतुर्यथा॥

स सामान्यविशेषत्वात् कार्यकारणभावतः॥
प्रकृतं यत्समर्थ्येतार्थान्तरन्यसनं मतम्॥ ७४॥

सामान्यविशेषभावेन कार्यकारणभावेन च प्रकृतस्य समर्थनं यत्र सोऽर्थान्तरन्यासः॥ सामान्याद्विशेषसमर्थनं यथा—

पलायमाना निधिपरिभूता। भीताश्च चक्रिपुरुषेभ्य आगात्॥
अचेतनेभ्योऽपि तथाहि सर्व-। मन्तर्भयानां भयमातनोति॥ ७५॥

अन्तःकरणे चकितानां सर्वं भयं करोतीति सामान्यं तृणकृतनरेभ्यो भीता इति विशेषं समर्थयति॥

महापुरुषसंसर्गादधमोऽपि सुधीर्भवेत्॥
पुरुदेवपदाश्रित्या तिर्यग्जीवो मुनीयते॥ ७६॥

जिनपदाश्रयेण तिर्यग्जीवो मुनीयत इति विशेषेण अधमोऽपि सुधीः स्यादिति सामान्यं समर्थ्यते इति विशेषात्सामान्यसमर्थनम्॥

कण्ठस्थः कालकूटोऽपि शम्भोः किमपि नाकरोत्॥
सोऽपि दन्दह्यते स्त्रीभिः स्त्रियो हि विषमं विषम्॥ ७७॥

अत्र स्त्रियो हीति विशेषात् स्त्रीभिरिति विशेषसमर्थनमिति विशेषाद्विशेष-

समर्थने च ज्ञेयम् ॥ अथवा सामान्याद्विशेषसमर्थनमेव विशेष इति सर्वो सामान्येन गिरिजादिसर्वविशेषस्य दाढर्चसमर्थनात् ॥ कार्यकारणभावेन यथा—

भक्ता भवन्तु भो जीवा न निर्भक्ता जिनेश्वरे ॥
सोऽभक्तसमभावोऽपि भक्तान् मान्यं नयत्यरम् ॥ ७८ ॥

भक्तिकार्येण मान्यनयनेन भक्तत्वं कारणं समर्थितम् ॥ कारणात् कार्यसमर्थनं तु काव्यलिङ्गे अन्तर्भूतमिति नोक्तमनोऽर्थान्तरन्यासस्य त्रयो भेदाः ॥

उद्दिष्टा यैः क्रमैरर्थाः पूर्वं पश्चाच्च तैः क्रमैः ॥
निरूप्यन्ते तु यत्रैतद्यथासंख्यमुदाहृतम् ॥ ७९ ॥

चित्ते मुखे शिरसि पाणिपयोजयुग्मे ।
भक्तिं स्तुतिं विनतिमञ्जलिमञ्जसैव ॥
चेक्रीयते चरिकरीति चरीकरीति ।
यश्चर्करीति तव देव स एव धन्यः ॥ २८० ॥

यत्र कस्यचिदर्थस्य निष्पत्तावन्यदापतेत् ॥
वस्तु कैमुत्यसन्न्यायादर्थापत्तिरियं यथा ॥ ८१ ॥

यत्रैकस्य वस्तुनो भावे तत्समानन्यायेन किमुतेत्यादिनाऽर्थान्तरमापतति साऽर्थापत्तिः ॥

यात्रामात्रेण चक्रचक्र्यो प्रणता मागधादयः ॥
सुरेशाः कम्पितात्मानः किमन्ये नृपमानिनः ॥ ८२ ॥

अपि च ।

अवटुतटमटति झटिति स्फुटपटुवाचाटधूर्जटेर्जिह्वा ॥
वादिनि समन्तभद्रे स्थितवति सति का कथाऽन्येषाम् ॥ ८३ ॥

सर्वत्र सम्भवद्वस्तु यत्रैकं युगपत्पुनः ॥
एकत्रैव नियम्येत परिसङ्ख्या तु सा यथा ॥ ८४ ॥

॥ प्रश्नाप्रश्नपूर्वकत्वभेदात् ॥ तद्द्वयमपि द्विधा वर्ज्यस्य शाब्दत्वार्थ-त्वाभ्याम् ॥ तत्र शाब्दवर्ज्या प्रश्नपूर्वा यथा—

आधारः कोऽस्ति जीवानां पुरुदेवो न विष्टपम् ॥
सलङ्कारमिलोक्याः कः पुरुर्न च सुरालयः ॥ ८५ ॥

अर्थगर्भा प्रश्नपूर्वा यथा—
तमोनिवारकः कोऽत्र वर्द्धमानजिनेश्वरः ॥
दीनर्मीकुरुते लोकं को दिव्यध्वनिरर्हतः ॥ ८६ ॥

अप्रश्नपूर्वा शब्दगर्भा यथा—
गोष्ठी विद्वत्सु न स्त्रीषु दया सत्त्वे न वैनसि ॥
चिन्ता तत्त्वे न कामादौ भरतस्येश्वरस्याङ्गिनः ॥ ८७ ॥

उभयगर्भा प्रश्नपूर्वा यथा—
परस्त्रीषु स जात्यन्धो निष्कार्येषु सदाऽलसः ॥
मूकः परापवादेषु पङ्गुः प्राणिवधेषु च ॥ ८८ ॥

श्लेषेणापि चाल्पत्वनिश्चयरूपा परिसंख्या यथा—
यत्रानेकत्वं कलिताटवीषु । पलाशिता द्रौ कुसुमेऽपराग. ॥
निमित्तमात्रे पिशुनत्वमासी- । च्छिद्रावकाशोऽप्यवपादिना च ॥ ८९ ॥
ऋतु. मास आवासटवीनां आनेकाम्नाना भाव । आनेकतां दु स्वरतो भावश्च ॥ द्रौ द्रुमे पर्णवत्ता मांसभक्षित्वं च ॥ परागः पुष्परजः अपरागः रागाभावः परेषामागोऽपराधो वा ॥ शुभाशुभकार्यसूचक वर्णअपदव च ॥ पद्म पद्म पदौ आदौ । येषां ते पदादय । पदादय अपद्मवर्णा न एषां तानि अपदादीनि तेषां भावस्तत्ता निन्दयदिना च ॥
प्रश्नोत्तरे निरूप्येते बहुधा चोत्तरादिषि ॥
प्रश्न उत्तरयते यत्र सोत्तरप्रहेलिका द्विधा ॥ ९० ॥
यत्रानेकधारमुत्तर प्रश्ननिरूपणपूर्वक तदेकमुत्तर यत्र च निश्चयनानानुगत्यस्य उत्तेय तदुत्तरं द्वितीयम् ॥ क्रमेण यथा
को लघुर्याचकः कोऽरि पाप्मा को बन्धुरागमः ॥
का निद्रा मूढता धर्मे बन्धाना जगत ...
किमथ ज्ञानत्वं सुधवरमहात्माग जगति । ...

प्रभुः श्रीवीरनाथोऽजनि भुवि यदा कल्पवृक्षो ॥
तदा जातो धर्मः परमहिमवः काममुरभि- ।
मेहाजैनाधीशद्विजिनविदिताः प्रादुरभवन् ॥ ९२ ॥
यदा वीरजिनो जातस्तदा धर्मः सुरभो जात. ॥ जैनोत्तमाश्च नानावर्ति-
भाजो बहवो जाताः ॥ किं पृच्छयते त्वयाऽधुनेत्युत्तरान् श्रीवीरप्रभौ तत्रै
धर्मोदितोदितत्वमस्ति किं! किं जैनाश्च सम्पत्तिमान्तः मंतीति! प्रश्न उत्तरे
अथ वाक्यन्यायमूलप्रस्तावेन विकल्पः सम्सूचने—
विरोधे तु द्वयोर्यत्र तुल्यमानविशिष्टयोः ॥
औपम्याद्युगपत्प्राप्तो विकल्पालंकृतिर्यथा ॥ ९३ ॥
आज्ञा मन्दारमालाऽस्य श्रियतां मूर्ध्नि भो नृपाः ॥
खड्गजातामिसन्दीप्तज्वालामालाऽथवा ध्रुवम् ॥ ९४ ॥
चक्रिणि प्रभवति भूपानां सन्धिविग्रहनामाभ्यां तुल्यप्रमाणाभ्यामाज्ञानु-
धारित्वकृपाणाग्निज्वालामालाधारित्वे युगपदेव प्राप्ते विरोधाचौपम्यगम्ये
विकल्पः ॥ एतत्प्रतिपक्षभूत समुच्चय उच्यते—
क्रियाणां चामलत्वादिगुणानां युगपत्तत ॥
अवस्थानं भवेद्यत्र सोऽलङ्कार समुच्चय. ॥ ९५ ॥
निष्क्रामति पुरः स्वामी स्तुवन्ति स्तुतिपाठकाः ॥
अनुयान्ति महीपाला वहन्ति शिबिका सुरा ॥ ९६ ॥
उदिते भामति ज्ञानदीधितौ पुरुभर्तरि ॥
विशद भव्यचेतोऽब्दकृपूकाना कलुष मन. ॥ ९७ ॥
उदाहरणद्वयमुक्त भिन्नविषयत्वे ॥ एकविषयत्वे यथा—
अहिंस्त्रर्महितोपदेशविमुखा मिथ्यादृशो जन्तव ।
श्वभ्रेषु प्रभवन्ति यान्ति दलन वाञ्छन्ति सौख्यास्पदम् ॥
अदयन्त्युत्पतनं च यान्ति निहता क्रन्दन्ति मूर्छन्ति ते ।
घूर्णन्ते प्रलपन्ति दु खनिवह ते भुञ्जते सर्वदा ॥ ९८ ॥

आदिष्टप्राणी सुदिते विशददहरकौतूहलं निर्मल- ।
स्फारार्थं वदनारविन्दविकचं भेरीरवव्यापनम् ॥
नानाभूषणकान्तिपुञ्जविसरव्याप्ताशमिन्द्रादयः ।
साकेतं मधुरत्नमाङ्गनिर्निति कुर्वन्त आराद्वराः ॥ ९९ ॥

अनेकेषां कारणानामहमहमिकया यत्रैकं कार्यं साधयितुमुद्यतः सोऽपि समुच्चय एव ॥ यथा—

शौचं सत्यं क्षमा त्यागः मार्गल्यं मृदुताऽऽर्जवम् ॥
वृषं चारु विवेकित्वं दयां पुष्णान्ति चक्रिणः ॥ १०० ॥

शौचादीनां धर्मसम्पादने प्रत्येकं कारणत्वेऽपि युगपदहमहमिकया सम्बन्धः ॥

कार्यसिद्ध्यर्थमेकस्मिन्हेतौ यत्र प्रवृत्तिके ॥
काकतालीयवृत्तोऽस्य समाधिरुदितो यथा ॥ १०१ ॥

कार्यसिद्धये यत्रैकस्मिन्कारणे वृत्ते काकतालीयन्यायेन कारणमन्यदागत्य तत्कार्यं सुष्ठु करोति स समाधिः ॥

चक्र्याश्लेषमियं कर्तुं विसस्रकुचवाससि ॥
वधूः पारावतस्तावत्कुञ्ज मणितध्वनिम् ॥ २ ॥

तत्प्रार्थितचक्रिणः परिरम्भमधीगमनार्थं कान्तया कुचवस्त्रविस्रंसने प्रवर्तिते काकतालीयनया जातेन पारावतध्वनिना आलिङ्गनलक्षणकार्यस्य सुकरत्वम्॥

लोकन्यायमूलालङ्काराः कथ्यन्ते—

यत्रात्यद्भुतचारित्रवर्णनाद्भूतभाविनोः ॥
प्रत्यक्षायितता प्रोक्ता वस्तुनोर्भाविकं यथा ॥ ३ ॥

न चातीतानागतयोः प्रत्यक्षवदवभासित्वं विरुध्यते! अत्याश्चर्यार्थवर्णनया भावकानां चेतसि भावनोत्कर्षः ॥ तथाच प्रत्यक्षायमाणत्वं भावनया पौनःपुन्येन चेतसि निदर्शनाद्घटत एव ॥

पिहिते कारागारे तमसि च सूचीमुखाग्रनिर्भेद्ये ॥
मयि च निमीलितनयने तथापि कान्ताननं व्यक्तम् ॥ ४ ॥

इत्यादावप्यगतार्थेऽपि प्रत्यक्षायमाणत्वसम्भवात् ॥

चक्रिसेनाग्रतो रेजे चक्राब्जमरसद्दलम् ॥
दलाग्रे यस्य वारिबिन्दुरिवालक्ष्यत सर्वभूः ॥ ५ ॥

सकलद्वीपसागरयुक्तायाः सर्वभुवश्च धारायां जलबिन्दुरूपतेति अद्भुतवर्णनया तत्र सा बिन्दुरेवेति भावनया भावकस्य प्रत्यक्षवत्प्रतीतिसम्भवः ॥ न चेयं स्वभावोक्तिरस्या विषयस्याद्भुतत्वेन भव्यत्वाभावात् ॥ नाप्युत्प्रेक्षा भाविनोः प्रत्यक्षत्वेनाध्यवसायाभावात् ॥ नेयं रसवदलङ्कृतिः अत्र विभावानुभावाद्यनुसन्धानेन रसादेर्माध्यस्थ्येन अद्भुतरसाभावात् ॥ भावना अभ्रान्तिनिरूपणाच्च भ्रान्तिमानपि ॥

यत्रेष्टतरवस्तूक्तिः सा प्रेयोऽलंकृतिर्यथा ॥
शृङ्गारादिरसोत्पुष्टिर्यत्र तद्रसवद्यथा ॥ ६ ॥

भो भव्याः पिबतादराच्छ्रवणपुटैः कल्याणवार्तासुधां ।
मादृक्षप्रजिनेशिनः सुरगिरौ जन्माभिषेकोत्सवः ॥
जातस्तेन सुरालयोऽजनि गिरिः स्वर्गायिता भूरपि ।
देवाः पावनमूर्तयो जनगणाः सर्वे कृतार्थीकृताः ॥ ७ ॥

विश्वलोकप्रियतरस्य पुरुजिनजन्माभिषेकस्य प्रतिपादनं

रहस्तु यत्र हरणे प्रवृत्ता । महासमाजाः क्षितिपालनद्याः ॥
स्वर्गापवर्गान्दर्पयतु वपुष्क । सम्पद्वरस्वा द्रवाम्बुः ॥ ८ ॥

अत्र शृङ्गारस्य पोषणम् ॥ एवं रसान्तरेऽपि योज्यम् ॥

यत्रान्यथापलापोऽर्थो यथा सोऽपह्नुतिक्रिया ॥
प्रत्यनीकं रिपु यत्राशक्तौ तत्सम्बन्धिदूषणम् ॥ ९ ॥

यत्र समर्थस्य प्रतिपक्षस्य निराकरणासामर्थ्ये तत्सम्बन्धिनिराकरणं प्रत्यनीकालङ्कारः स ॥

यत्तेजोऽनन्यसाधारणपरिगलितविश्वदेवाधिपा ।
यस्मादर्धनिशाधिनिर्जितमिता मेघाश्रयाप्या गतः ॥
तद्वृत्तं मम मण्डितेन पतिना यूयं कुरुध्वमामुन ।
श्रेष्ठमणिभयम्यावरदिना अपापान्यपातिन का ॥ २१० ॥

अत्र जयकुमारस्यास्मभाषा ॥

यत्कीर्तिर्वैरिसम्पूर्णाजितस्वमहिमा शशी ॥
तस्याम्बुधिमहाशयं पद्माकरमपास्यति ॥ ११ ॥

यत्कीर्त्यम्बुधिनी महालक्ष्मीर्यस्य अथवा महाशया निधयः । पक्षे अम्बुजानि । तयाऽस्यारिकुलपङ्कजानां सम्बन्धित्वं वा ॥

यद्वस्तु येनचित्कर्त्रा येन साधितमन्यथा ॥
तथैवान्यकर्त्ता चेद्व्याघातः स समाख्यते ॥ १२ ॥

यद्वस्तु येन केनापि कर्त्रा येन साधनेन साधितं तेनैव साधनेन तद्वस्तु अन्येन कर्त्राऽन्यथाक्रियते चेत्स व्याघातः ॥

बाहुभ्यां सत्यमेधार्थं गर्वपर्वतवैरिभिः ॥
निःसारीकृतमेताभ्यां महता चक्रपाणिना ॥ १३ ॥

क्रमेणानेकमेकस्मिन्नेकं वा यदि वर्तते ॥
अनेकस्मिन्नयत्राधेयं पर्यायः स द्विधा यथा ॥ १४ ॥

अनेकमाधेयमेकस्मिन्नाधारे यदि वर्तेत एकः पर्यायः । क्रमेणेत्यनेन समुच्चयालङ्कारव्यवच्छेदः तत्रैकत्रानेकेषां युगपद्वर्तनात् ॥ यत्रानेकस्मिन्नेकं यदि स द्वितीयः । अत्रापि क्रमेणेत्यनेन विशेषालङ्कारविच्छेदः तत्रानेकत्र एकस्य युगपद्वर्तनात् ॥

कुवादिनः स्वकान्ताना निकटे परुषोक्तयः ॥
समन्तभद्रयत्यमे पाहि पाहीति सूक्तयः ॥ १५ ॥

अत्र विजिगीषोस्तद्द्विषोरुक्तीनां एकाधारे अनेकेषां क्रमेण प्रवृत्तिः ॥

लक्ष्मीः पद्माकरस्था जडगृहमिदमित्याश्रिता चन्द्रमत्र ।
स्थित्वा दोषाकरोऽयं स्रवति च पुनरतः संश्रिता मेरुमत्र ॥
स्थित्वा गर्वोन्नतोऽयं भवति पुनरिति प्राप्य तस्मात्क्षितीश ।
तस्य श्रीवक्षसीद्धे स्थिरतरमहसि स्थैर्यभागावदष्टि ॥ १६ ॥

एकस्या लक्ष्म्याः सरःप्रभृत्यनेकत्र क्रमेण प्रवर्तनम् ॥

विरुद्धभासबोध्यस्य वस्तुनो यत्र भासनम् ॥

छायाकारेङ्गिताभ्यां हि सा सूक्ष्मालंकृतिर्यथा ॥ १७ ॥

सुभद्रा नवसंसर्गे प्रिये क्षुतवति द्रुतम् ॥
ईषदुद्भिन्नबिम्बोष्ठी स्वकर्णस्पर्शनं व्यधात् ॥ १८ ॥

नूतनसङ्गे लज्जया दीर्घायुर्भवेति वक्तुमशक्तया स्वकर्णस्पर्शनेन तदर्थः प्रकाशितः ॥

महासमृद्धिरम्याणां वस्तूनां यत्र वर्णनम् ॥
विधीयते च तत्र स्यादुदात्तालंक्रिया यथा ॥ १९ ॥

समवसरणमध्ये मन्नपादप्रणम्रान् ।
मकुटघटितरत्नान् दिग्विराजप्रभाभान् ॥
त्रिदशमनुजराजान् स्तोत्रसंघट्टरम्यान् ।
प्रमुदितमनसस्तान्वीक्ष्य दृष्टः ॥ चक्री ॥ २० ॥

भवेद्विनिमयो यत्र समेनासमतः सह ॥
समन्यूनाधिकानां स्यात्परिवृत्तिस्त्रिधा यथा ॥ २१ ॥

समेन समन्यूनाधिकयोः [illegible] सह विनिमयः परिवृत्तिः । तत्र समेन सह परिवृत्तिर्यथा ॥

[illegible] विनार्थात्मे [illegible] ॥
[illegible] दत्वा [illegible] ॥ २२ ॥
[illegible] ॥
[illegible] दुर्लभानि [illegible] ॥ २३ ॥

[illegible] न्यूनाधिकपरिवृत्तिः ॥

[illegible] विना [illegible] ॥
[illegible] ॥ २४ ॥

[illegible] न्यूनाधिक [illegible]
[illegible] –

[illegible] पूर्वं पूर्वं यथा क्रमात् ॥
[illegible] यथा ॥ २५ ॥

धर्मेण पुण्यसम्प्राप्तिः पुण्येनार्थस्य सम्भवः ॥
अर्थेन कामभोगश्च क्रमोऽयं कथितः स्फुटः ॥ २६ ॥
यत्रोत्तरोत्तरं पूर्वं पूर्वं प्रति विशेषणम् ॥
क्रमेण कथ्यते सैकावल्यलङ्कार इष्यते ॥ २७ ॥
पुरन्दरपुरी श्राद्धश्रावकजनशोभिता ॥
श्रावकाः स्थिरधर्माणो धर्मो यत्र दयात्मकः ॥ २८ ॥

इदमुदाहरणं स्थापनेन ॥ अपोहेनापि स्याद्यथा—

न सा सभा कविर्वादिगुणिविद्वज्जनोज्झिता ॥
विद्वज्जना न ते शब्दशास्त्रज्ञानविवर्जिताः ॥ २९ ॥
यत्रोत्तरोत्तरं सम्युत्कृष्टत्वावहता भवेत् ॥
पूर्वपूर्वस्य वै तत्स्यान्मालादीपकमिष्यते ॥ ३३० ॥
आदिदेवाऽऽप सद्बोधं बोधः सर्वार्थसञ्चयम् ॥
पदार्थनिचयोऽप्याप लोकालोकस्वरूपताम् ॥ ३१ ॥

यत्रोत्तरोत्तरोत्कर्षः सा सारालङ्कृतिर्यथा—

तत्त्वे जीवोऽत्र भव्यस्तमपि जिनमतोऽत्रापि पञ्चाक्षसंज्ञी ।
मर्त्योऽसौ विवेकी धनिक उत्कृष्टोऽत्रापि सम्यग्दृगत्र ॥
कारुण्याढ्यो मनाज्ञोऽत्र च सकलयमी धर्मसद्ध्यानकोऽत्र ।
शुक्लध्यान्यत्र कर्मक्षपक इह ततः केवली सिद्ध एव ॥ ३२ ॥

त्रिभुवनैकसारभूत सिद्धपरमेष्ठिनि विषयत्वेन सारः इत्यस्यालङ्कारस्यान्वर्थसंज्ञा ॥ इत्यर्थालङ्कारान् निरूप्येदानीं संसृष्टिसङ्करौ कथ्येते । यथा लौकिकानां कनकमयानां च पृथक् पृथक् सौन्दर्यकारणानामपि हाराद्यलङ्काराणामन्योन्यसम्बन्धेन रम्यता दृश्यते तथैव रूपकादीनामलङ्काराणामन्योन्यसम्बन्धेन रम्यतातिशयो गम्यते ॥ तिलतण्डुलन्यायेन संयोगरूपः क्षीरनीरन्यायेन समवायरूपश्चेति स च सम्बन्धो द्विधा । आद्येन न्यायेन संसृष्टिरन्त्येन सङ्करः ॥ शुद्धिरेकप्रधानत्वमेकाकारप्राधान्यरूपा स्यादिति शुद्धिमिच्छन्ति संसृष्टिसङ्करयोः पृथक्त्वं नेच्छन्ति । इह तु तयोः पृथक्त्वा-

…त्पर्वता. भूतोपद्रवाश्च । इन्द्रो जयदर्शनश्च । अग्नि पवित्रश्च । तत्र सा-
…वर्जितविधूतव्रतश्च । नैर्ऋत रक्षांसि रक्षा धर्मस्य । अरि अरत्वे वेति
…विकल्पितत्वकुत्स्यात् । वरुण प्रकृष्टं चेतो यस्य च । वायुः लोके प्राय-
…सुखीवर्तीति च । अनेकानाश्रितान्यानीति । कं सुखं चरतीति कच्छः
…द्विरिलं पतीतिच । सर्वसुता पालका यत्ताश्च ये न एव चक्री ॥

शून्यत्वतापकृचिन्ता स्वेष्टानामिगमस्मृतिः ॥
प्रियानुपद्धचित्ता सा न पश्यति न वक्ति च ॥ ३१ ॥
स्वेदोत्कर्षणहृत्खेदो मार्गरत्यादिजः श्रम ॥
स्विन्नांग्यनिलवान्छाऽगाद्रतान्ते लुलितालका ॥ ३२ ॥
…वासगेहाद्बहिर्गता ॥
बोधामीष्टागमाद्येन मनोनिःस्पृहता धृति ॥
भरते कृतकृत्या सा मन्यते तृणवज्जगत् ॥ ३३ ॥
इष्टानिष्टागमोद्भूता जाड्यमप्रतिपत्तिधीः ॥
चनिग्यस्यागते दृष्टा नाभ्युत्थानोपचारकृत् ॥ ३४ ॥
आरमोत्कर्षोऽप्यधिकाराद्भवेः शौर्यबलादिजः ॥
समामे नृपक्रीडानां स्थितिः केति जयोऽवादीत् ॥ ३५ ॥
निर्वेदोऽनल्पधीर्दुःखेर्ष्यातत्त्वमज्ञतादितः ॥
दैन्यचिन्ताश्रुनिश्वासाः सम्भवन्त्यत्र तद्यथा ॥ ३६ ॥

कर्पूरेण कृतं हिमांशुकिरणैः किं चन्दनैः किं बिसैः ।
पर्याप्तं मृगनाभिभिः किसलयैः किं मन्दवातैरलम् ॥
हारेणाऽलमलं कुशेशयदलश्रेणीनालवृन्तेन किं ।
तं चक्रेश्वरमालि सर्वगुणिनं क्षीमं त्वमाकारय
कार्पण्यं स्वाद्नौद्धत्यं दैन्यं सत्त्वात् …
मद विद्वर मा मा कूज पारावत त्वं ।
विरम … इत्यादि ॥
अनिल सपत्रो त्वं … ।

स्मर पदनविशेष्यानेनुमान्ती गतेशम् ॥ ३८ ॥

क्रोधः कृतापराधेषु पुनः प्रज्वलनं यथा ॥

रे पान्थास्तु विदिक्षु दिक्षु यदि नो विक्षिप्यतेऽम्भोत्करः ।
धौतकौशेयककुक्षिपोटनमथो भक्ष्येत पद्मादिभिः ॥
इत्याद्युक्तिकठोरतापकटितक्रोधानलाः सद्भटाः ।
अनेको द्विपतोऽखिलास्तत इतः संक्रमयन्ति स्म ते ॥ ३९ ॥

ईर्ष्या सा स्यात् परोत्कर्षासहिष्णुत्वं स्फुटं यथा ॥

तस्यां सर्वाऽपि सम्पत्तिः किमत्रागम्यते स्मर ॥ ४० ॥

स्वेदकम्पादिकृद्दर्पः प्रसादस्तूत्सवादितः ॥

कृतार्थोऽस्य यथाऽन्यस्य संगमोत्सवतोऽचिरात् ॥ ४१ ॥

तर्जनादिकृदुग्रत्वं चण्डताऽऽगसि धीक्षिते ॥

खण्डिताधर गच्छेति तर्जितोऽस्याः पदे नतः ॥ ४२ ॥

स्मृतिः पूर्वानुभूतार्थविज्ञानं कथितं यथा ॥

चकितेत्यमहोरस्थश्रीगुलं कोऽनु वर्णयेत् ॥

यत्सङ्कल्पपरिरब्धायां मे सुरतं वर्णनातिगम् ॥ ४३ ॥

मरणाय प्रयत्नो यः सा मृतिः कथिता यथा ॥

रथाङ्गद्वयवियोगासहा कामिनी सा । विषवे श्रुती कोकिलारवलग्ने ॥
दयाविन्दुहृष्टी तनु मन्दयातु । स्पृष्टं प्राणमम्भोरुहापाणशायम् ॥ ४४ ॥

मद्यादिविहितो मोदहृद्विभ्रान्तिकरो मदः ॥

अयुक्तमप्यलपनयान् प्रमत्तः । सखाऽन्तिकस्था मधुपः सुवश्यः ॥
प्रविश्य वात्यागमतः सलीलं । यथा निलिन्या मधुपोऽन्तरङ्गम् ॥ ४५ ॥

उद्वेगश्चेतसोऽशान्तिर्भूयात्सुन्नीदनादिकृत् ॥

राजसुनिपतन्ति सन्मार्गे गते कुलकमायिय ॥ ४६ ॥

चेतोनिमीलनं निद्रा स्वप्नेक्षितसुखाप्रम् ॥

स्वादते कुसुमं स्वादं गगने मालिनाऽद्यतौ ॥ ४७ ॥

अवहित्थाऽऽकृतेर्गुप्तिः —

[illegible] । [illegible] ॥
[illegible] । [illegible] ॥
[illegible] ॥

[illegible] ॥ ४९ ॥
[illegible] ॥
[illegible] ॥
[illegible] ।
[illegible] ॥५०॥

[illegible] ।
[illegible] ।
[illegible]
[illegible]
[illegible]
कृत्वा दिग्विजयं पुरीं प्रविशति श्रीमान् [illegible]
यस्य स्तोत्रकुचांशुका मणिमयस्तम्भ [illegible] ।
मैत्र्यम्पर्णगतं स्वनायकमिव प्रोत्तुङ्गपीनस्तनी ।
श्रीकामागमवेदिनी [illegible] तं प्रेक्षते ॥ ५२ ॥

मृदु सावेशचिन्ताभिः स्यान्मोहो मूर्च्छनं यथा ॥

सम्प्रेक्ष्य दूतीश्चिरयत्यधीशे । तदेन्दुपादैः प्रहता लताङ्गी ॥
सम्प्रेषिता सान्त्वसखीव [illegible] ताः । सन्तर्जितुं मूर्च्छितमूर्विरासीत् ॥

मतिरर्थविनिर्णीतिस्तत्त्वमार्गानुसन्धितः ॥

प्रतापवक्रिणः सोऽयं वह्निरेव न संशयः ॥
यत्प्रवेशनमात्रेण निर्दग्धा रिपुसन्ततिः ॥ ५४ ॥

अलसत्वं तु कर्तव्ये या मन्दोद्यमता यथा ॥

समास्तां गृहव्यापृतौ किंवदन्ती । स्वकार्योप[illegible]दमयन्ती
पिकीपंचमोक्तिश्रुतिप्रेरिता सा । [illegible] ॥

तुल्यवर्तनमुन्मादश्चेतनाचेतनेष्वपि ॥

चक्रव्यानकध्वनिभ्रान्त्या मन्त्रयन्तेऽरयो द्रुमैः ॥ ५६ ॥

दु न्ममोहादिना वेगोऽस्त्वाराः क्वापतापकृत् ॥

निधिपतिविरहिण्यः सम्मतो वीक्ष्य चन्द्रं ।

मुदयगिरिनिषण्णं रक्ष मा वीक्ष पांसून् ॥

इति यवनविधानाः सम्भ्रमोत्था लुठन्त्यः ।

स्वगृहभुवि सलीला व्यस्तनाम्नाऽऽह्वयन्ति ॥ ५७ ॥

व्याधिर्ज्वराधिकस्तापश्चेतमोऽभिमरायथा ॥

यै यत्र चक्रिरणेऽरिवृन्दे । सह प्रया[illegible] वनितास्तदीयाः ॥

[illegible]वर्तमाने मदनज्वराग्नि । कुण्डे पतन्ति स्म वपुर्निरासाः ॥ ५८ ॥

निद्रायास्तु समुद्रेकः सुप्तिः सा कथिता यथा ॥

राज्ये समस्तेऽरिजयात्तिर्षीता । सुप्ते रि[illegible]दनितानिलेन ॥

सोमर्द्धिपुकोऽपि तदश्विवाभिर्वार्षिमुरारेर्न भिनत्ति निद्राम् ॥ ५९ ॥

फालासहनमौत्सुक्यं चेतस्तापन्त्वरादिकृत् ॥

विनीता नगरीनार्यो विभूष्य कृतसम्भ्रमा ॥

विलम्बित महन्ते स्म कृ[illegible]रेण निधिरागमं ॥ ६० ॥

विलम्बिन महन्ते स्म कृ[illegible] [illegible] उद ॥

उपाय पार्याचि[illegible] [illegible] ॥

[illegible] विनम[illegible] [illegible] गति ॥ ६१ ॥

[illegible]

[illegible] ॥

[illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

स्यारोगोन्मादहीनाः शेषाः ॥ धीरे निर्वेदमदिरा रौद्रोक्ताः सर्वे ॥ मध्यमे धृतिमदगर्वोद्वेगगर्वसुप्तिनिद्रापस्मारादिरथामर्षौग्र्यप्रमादहीनाः शेषा ॥ वीरेऽद्भुते च मतिचिन्तादयो यथासम्भवमूह्याः ॥ शान्ते धृतिनिर्वेदौ ॥

रसभावाभिनेतृत्वेऽपि हृत्ते नर्तके रसाः ॥
भावा न किन्तु सभ्येषु स्मृतपूर्वरसादिषु ॥ ६३ ॥

उद्देशक्रमाभावेऽपि रसनिरूपणस्य भावनिरूपणपूर्वत्वात् भावा उक्ताः ॥ अथ दशावस्थाः शृङ्गाररसस्य अङ्कुरितत्वप्रतिपत्तिहेतवः कथ्यन्ते ॥

रत्युल्लाससमुद्भवाः खलु दशावस्थाश्च चक्षुर्मनः- ।
प्रीत्यासक्तियुग पुनर्मुधि तथासङ्कल्पको जागरः ॥
सम्प्रोक्ता तनुता तथा च विषयद्वेषस्त्रपानाशन ।
मोहो मूर्च्छनमप्यतो मृतिरिति प्रोक्ता दशा विच्युतेः ॥ ६४ ॥

आदरमेक्षणं यत्र चक्षुःप्रीतिर्यथा पुनः ॥
साकिर्मुहुर्मुहुश्चिन्ता प्रतिकृत्यादिभिर्यथा ॥ ६५ ॥
अधरस्तननाभ्यन्तश्रोणीचरणवीक्षणैः ॥
पराङ्मुखेक्षितैश्चक्रे सा तस्य स्मरदीपनम् ॥ ६६ ॥
स्वरूपसाम्यमनसा करिसत्करौ च ।
मेरोः प्रवाहशिखरे शशिनं च पद्मम् ॥
मेरुं नितम्बसुभगं विलिलेख कान्ता ॥
त्वां लज्जिता मम पुरो विलिखन्त्यपीनम् ॥ ६७ ॥
वाञ्छा शुभमिवावासौ संकल्पो भणितो यथा ॥
निद्राक्षयः प्रियाऽलाभादनिशं जागरो यथा ॥ ६८ ॥
तावारूढौ च दुर्मोचप्रेमबन्धौ मनोरथम् ॥
दुर्लभाश्लेषसम्भोगफललाभार्थमार्थिनौ ॥ ६९ ॥

कामिनी विरहतस्त्वयात्रवी- । दित्यसौ निशि सुजागरापि ॥
आलि मां रविकरात्सुतापिनीं । रक्ष रक्ष नृपमानभानुना ॥७०॥

कामज्वरेण कायस्य तापने तनुता यथा ॥

निश्चलत्वमदिग्धत्वं विषयद्वेषणं यथा ॥ ७१ ॥

नीलाब्जमण्डनमृते धनिनेन्दुरेखा । तन्वंगिनी विधुधनुल्यमृतप्रपाना ॥
पक्षद्वयेऽपि विरहात्तरिवृद्धिहीना । किं ते मनःकुमुदमीप्सति सुप्रवेष्टुम् ॥

सर्वांतसारिरमणी मुनिशम्य भीता ।
सल्यास्यदर्पणयुगं न च पश्यतीयम् ॥
मुग्धा न निधाभिनि कोकिलचन्द्रबिम्बः ।
मन्दानिलाशयगता नृप मन्मथार्ता ॥ ७२ ॥

अपानाशो गुरुत्वस्यागणनान्मानमोचनम् ॥
मनोवैकल्यतो मोहः स्यादुन्मादो यथा द्वयम् ॥ ७४ ॥

मन्दानिले वहति गुञ्जति च द्विरेफे ।
मत्ते निकूजति पिके कलकूजनाढ्ये ॥
पारावते च नृप सा विजहाति मानं ।
गन्तुं पदे नय समिच्छति मन्मथार्ता ॥ ७५ ॥

माकन्दमञ्जुलतामवलम्ब्य मुग्धा ।
जल्पे हि पश्य वचनादनुनीय क्षिप्ता ॥
आनेतुमक्षमतया गलदश्रुनेत्रा ।
कोपेन सा दमति भो धरचक्रपाणे ॥ ७६ ॥

मूर्छा सेन्द्रियवैकल्यान्मुहुरज्ञानृता यथा ॥
प्राणहानिः प्रियालाभलक्षणं च मृतिर्यथा ॥ ७७ ॥

आमीलिताम्बकयुगा मलयोद्भवोरुः ।
चर्चा स्खलत्प्रलपिता गलितोरुहारा ॥
मूर्च्छायुता कलयते सुरतान्त्यसौख्यं ।
श्रीराजराज वनिता परिरभ्यतां सा ॥ ७८ ॥

अत्रान्तरे यदि न गच्छसि तत्समीपं ।
श्रीब्रह्मनुनृपते मदनः कृशाङ्गीम् ॥
नेष्यत्यशेषवनितातिलकायमाना- ।

भावेष्वनुभावाः स्युराशीविस्फालनादयः ॥ ९८ ॥
सात्त्विका अश्रुवैवर्ण्यस्वेदाद्या निरूपिताः ॥
कपोलाक्षिविकासि स्यादुत्तमे मृदुभाषणम् ॥
विदीर्णास्यशिरःकम्पि मध्यमे हसितं मतम् ॥ ९९ ॥
शिरःकम्पाश्रुमत्कायचलं सद्बाष्पबिन्दुकम् ॥
आनन्दशपनस्थानमधमे हसितं मतम् ॥ १०० ॥
पुष्टः शोको विभावाद्यैः स एव करुणो द्विधा ॥
इष्टनाशादनिष्टाप्तेर्जो निरालम्बनं यथा ॥ १ ॥

हा जगत्सुभग हा जगत्पते । हा जनाश्रयण हा जनार्दन ॥
हा [illegible] मां । हाऽनुजेहि [illegible] इति चारुदत् ॥ २ ॥

इष्टस्य वियोगोऽनिष्टात् ॥

हा निर्दय कथमकर त्वया । मोच्यतां मम पतिः कुधीरयम् ॥
[illegible] ॥ ३ ॥

अथ [illegible] ॥

[illegible] ॥
[illegible] ॥ ४ ॥
[illegible] ॥
[illegible] ॥ ५ ॥
[illegible] ॥
[illegible] ॥ ६ ॥
[illegible] ॥
[illegible] ॥ ७ ॥
[illegible] ॥
[illegible] ॥ ८ ॥
[illegible] ॥
[illegible] ॥ ९ ॥

पञ्चमपरिच्छेदः ।

अन्यालोकनगम्यदानि मम ता धर्ता च सत्नाधवो ।
नो गृह्णन्ति महाश्मी च कनकः पूज्यो महासम्पदा ॥
ये मानुनस्पृण्दो शृदिवरान्ते तर्पणीया धने ।
रित्याश्विन्त्य धनित्नेषु कृतवाधकधन्यजन्मन्यपि ॥ ११० ॥
श्वेदोमार्गानगिरानिह भवगहने आज्वलद्दुःसहाव ।
स्कन्धे यं गन्यमाणानतिचकितमिमानुद्धरेय घराकान् ॥
इत्यालोहत्यरानुमहरमविकसद्भावनंपाठपुण्य ।
प्रमन्नैरेव यावये. शिवपथमुचितान् शास्ति योऽर्हत्स नोऽव्यात् ।
यच्छेऽजोऽनलदग्धनाकपतिगाथविधिमर्यं देवाधिपा ।
यन्नादद्युतिदारिणिकहमिना मेघम्बराल्यां गतः ॥
तद्गा मम गर्जितेन पतिता मूर्धा युल्लसमामृत ।
श्वं कन्समिमेकमात्रगदिताः श्लाघाऽन्यपानेन का ॥ १२ ॥
आलम्बनत्वेव मात्रदानवैरिश्च क्रमात् ॥
उद्दीपो दानमुन्नोऽकदानोत्स्याज्ज्वनादयः ॥ १३ ॥
अनुभाव प्रसादोऽस्महोऽन्ये पुलकादय ॥
र्भा पुष्टा या विभावाद्यैर्भयानकरसो यथा ॥ १४ ॥
चर्विर्वतनिरन्विचद मृ चनेदननन्नना ॥
गृहाया नेत्रभासा नमोऽह्मसुमन ॥ १५ ॥
गृहाया नेत्रभासा नमोऽहंकमुखन ॥
वैविभक्त्वं धृता भावा आलम्बना मना ॥ १६ ॥
उद्दीपना विभावत्व र नाग्नत्वाननादय ॥
अनभावि विभा कल्पाचपत्कल्पविन्द ॥
सहा च मा रवत्वं भवं दयाया व्यभिचारिणा ॥ १७ ॥
जुगुप्सव च न सहा न वीभत्सना किया ॥
जुगुप्सय लोकेगवनदाल्या म क न यथा ॥ १८ ॥
भृप न्नग्नादमवाविमुत्यविपुराजसवनकृपाकरवान ।
स्वदभूनाह सवच्छोणितमाहितमहापूनिपूयाद्रकाय ॥

नीराज्यो यत्र तत्र प्रसवति जनता दुर्जुगुप्स्यश्च तस्मा-।
त्तस्मान्निष्कासितोऽभूत्तनुमलकलितो विसयन् सर्वप्राणाः ॥ १९ ॥
वर्चोगृहं विषयिणां मदनायुधस्य ।
नाडीव्रणं विषमनिर्वृतिपर्वतस्य ॥
प्रच्छन्नपातुकमनङ्गमहाहिरन्ध्रं ।
माहुर्बुधा जघनरन्ध्रमधः सुदत्याः ॥ १२० ॥
आलम्बनविभावा ये जुगुप्स्यपुरुषादयः ॥
उद्दीपनविभावाः स्युर्व्रणगन्धादयस्त्विह ॥ २१ ॥
नासाच्छादनवेगाद्या अनुभावास्तु सात्त्विकाः ॥
पुलकाद्यास्तु निर्वेदप्रमुखा व्यभिचारिणः ॥ २२ ॥
विभावाद्यैस्तु यः पुष्टो विस्मयः सोऽद्भुतो यथा ॥
चक्रे नेत्रे च सूतोऽपरपरसमयो वाजिनः सूतभेदाः ।
सूताभिज्ञो रथी च त्रिजगति नियता ज्या रथो वायुतत्त्वम् ॥
बाणःस्थेमस्थसूतो मनसिजजनकः कार्मुकं सूतदृश्यं ।
स्वादृश्यं लक्ष्यचक्रं रणमिदमवतु प्रस्तुतं प्राणिवृन्दम् ॥ २३ ॥

नेत्रे द्वे भेदाभेदसम्यक्त्वे च । अपरपरसमयः पूर्वापरकालः ॥ अपरस्य स्वमतस्य परस्य परमतस्य समयो ज्ञानं श्रुतज्ञानमित्यर्थः ॥ सूतभेदाः श्रुतविकल्पा शुद्धाशुद्धसद्भूतासद्भूतनिश्चयव्यवहारा नयाश्चत्वारः॥ सूताभिज्ञः श्रुतार्कथंचिदभिज्ञो भाविजिन ॥ त्रिजगति नियता सर्वत्र नियमेन कृपा दया। वायुतत्त्वं वायोरिव निस्सङ्गत्वमात्मनः स्वरूपं । स्थेमस्थसूतः स्थिरतरश्रुतबोधः ध्यानमित्यर्थः ॥ मनसिजजनकः विष्णुः पक्षे मनसिजो विशुद्धिपरिणामस्तदुत्पादकश्चित्तविशेषः विशिष्टं मन इत्यर्थः ॥ सूतदृश्यं श्रुतज्ञानग्राह्यं । स्वादृश्यं स्वेन रथिना ध्यात्राऽदृश्यं कर्म चक्षुराद्यगोचरत्वात् ॥

शास्त्रिणां चित्तचमत्कारि वस्त्वालम्बनमीरितम् ॥
उद्दीपनविभावोऽस्मद्वोजस्पादिवर्णनम् ॥ २४ ॥
अनुभावाः कपोलाक्षिविकासाद्यास्तु सात्त्विकाः ॥

प्रस्वेदपुलकाद्याःस्युः प्रोक्ता हर्षादयः परे ॥ २५ ॥
शमः पुष्टो विभावाद्यैरेव शान्तरसो यथा ॥
पुत्रं पौत्रं कलत्रं प्रियमपि निखिलं प्राणिनां भ्रान्तिहेतुं ॥
मुक्त्वा लोलायमानं कपिवदपि मनः श्रीपुरारेरङ्घ्रियुग्मे ॥
कृत्वाऽऽहन्त्वं सुखात्व कनुपठतिदरं मायमन्यापवर्तुं ।
क्षेत्रं कोणे वसामि कचिदुरवामतः किं परैः पापिसङ्घैः ॥ २६ ॥
आलम्बनविभावाः स्युरार्हन्त्यपदवीमुखाः ॥
उद्दीपनास्त्वनेकान्तसाधुसम्भाषणादयः ॥ २७ ॥
अनुभावोऽत्र भाव्येत सर्वत्र समदर्शिता ॥
निष्पन्दतादयः सूक्ताः सात्त्विका मुनिसत्तमैः ॥ २८ ॥
निर्वेदो धृतिरुद्बोधस्तर्कः स्मृतिमती तथा ॥
इति सञ्चारिणो भावाः स्युः शान्तरसनायके ॥ २९ ॥
उभौ शृङ्गारबीभत्सौ द्वौ च वीरभयानकौ ॥
उभौ रौद्राद्भुतौ हास्यकरुणौ वैरिणौ मिथः ॥ १३० ॥
शृङ्गारजनितो हास्यो रौद्राच्च करुणो मतः ॥
अद्भुतो जायते वीराद्बीभत्साच्च भयानक ॥ ३१ ॥
शान्त सर्वोत्कृष्टत्वान् केनचिन्मैत्रीं विरोधं च न लभते ॥
जीवस्य परिणामत्वाच्च रसो रक्तादिभाक् ॥
तथाऽपि काव्यमार्गेण कथ्यते तत्क्रमोऽधुना ॥ ३२ ॥
श्यामाभो विष्णुरिन्दुद्युतिरभवदनस्थिरफणायां यमो वै ॥
रक्तो रुद्रोऽपि गौरत्विडपि सुरपतिपूर्ववर्णो महादि ॥
कालो नीलश्च नन्दी कनकरुचिरज शुभ्रवर्णः परादि- ।
ब्रह्मा शृङ्गारमुख्ये क्रमत इह मता वर्णभेदोऽयमेवम् ॥ ३३ ॥
गुणसंश्लिष्टशब्दौघसन्दर्भो रीतिरिष्यते ॥
त्रिविधा सेति वैदर्भी गौडी पाञ्चालिका तथा ॥ ३४ ॥
मुक्तसन्दर्भपारुष्याऽनतिदीर्घसमासिका ॥

उज्झिता कठिणैः शब्दैर्वैदर्भी मणिना यथा ॥ ३५ ॥
प्राज्ञः प्रासममस्तमाशहृदयः प्रत्यक्तलोकस्थितिः ।
प्राप्ताशः प्रतिभापरः प्रशमवान्प्रागेव दृशोचरः ॥
प्रायः प्रश्नसहः प्रभुः परमनोहारी पराऽनिन्द्या ।
ब्रूयाद्धर्मकथां गणी गुणनिधिः प्रस्पष्टमृष्टाक्षरः ॥ ३६ ॥
ओज कान्तिगुणापूर्णा या सा गौडी मता यथा ॥
श्रीमन्नम्रसुरासुराधिपचलन्मौलिप्रभास्वन्मणि- ।
श्रेणीश्राणितसन्ततार्घ्यविभवो यत्पादपीठीतटः ॥
वाचोयुक्तिविविक्तवस्तुविसरो दुष्कर्मनिर्मूलनो ।
जीयात्सूरिसुभाषितार्जितमहः सोऽयं जिनेन्द्रप्रभुः ॥ ३७ ॥
उक्तरीत्युभयात्मा तु पाञ्चालीति मता यथा ॥
न स्नेहाच्छरणं प्रयान्ति भगवन्पादद्वयं ते प्रजा ।
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ॥
अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमण्डलो ।
ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः ॥ ३८ ॥

प्रसादादिसर्वगुणपूर्णा असमस्ता द्वित्रिपदसमस्ता वा वर्गद्वितीयाक्षरप्रचुरा स्वल्पघोषाक्षरा वैदर्भी ॥ समस्तात्युद्भटपदा महाप्राणाक्षरा कान्त्योजोगुणा गौडी ॥ समस्तपञ्चषपदा ओज कान्तिसौकुमार्यमाधुर्यान्विता पाञ्चाली ॥ सकलरीतिसम्मिश्रा मृदुसमासा बहुयुक्ताक्षररहिता स्वल्पघोषाक्षरा लाटी । इति रीतिचतुष्टयमिच्छन्ति केचित् तदपि ज्ञेयम् ॥

अथ शय्यापाकौ कथ्येते ॥

पदानुगुण्यरूपा या मैत्री शय्येति कथ्यते ॥
पाकोऽर्थानां गभीरत्वं द्राक्षापाकोऽपरो द्विधा ॥ ३९ ॥

प्रावृट्काले सविद्युत्प्रपतितसलिले वृक्षमूलाधिवासा ।
हेमन्ते रात्रिमध्ये प्रतिविगतभयाः काष्ठवत्त्यक्तदेहाः ॥
ग्रीष्मे सूर्यांशुतप्ता गिरिशिखरगताः स्थानकूटान्तरस्थाः ।

ये ये धर्मं प्रदधुर्मुनिराजभूतया मोक्षनिर्वाणिभूताः ॥ ४०॥

अत्र वस्त्वन्यपदार्थविनिमयमहत्त्वेन पदान्योन्यमैत्र्यरूपा शय्या ॥

द्राक्षापाकः स कथ्येत बाह्यान्तःस्फुरद्रसः ॥
स्यान्नालिकेरपाकोऽयमन्तर्गूढरसो यथा ॥ ४१ ॥

रहस्सु धर्माहरणे प्रवृत्ताः । महाप्रगल्भाः क्षितिपालवध्वाः ॥
सदैव कन्दर्पधनुःप्रयुक्ताः । शराघ्नवुकाररया इवालुः ॥ ४२ ॥

श्रेयोमार्गानभिजानीहि भवगहने जाज्वल्यदुःखदावः ।
इत्यर्थं चरन्त्यमाणाननिचकितमिमानुद्धरेयं वराकान् ॥
इत्यादिकरुणानुसन्धानविक्रमद्वारनोपात्तपुण्यः ।
प्रकान्तैरेव यात्रैः शिवपदमुचितान्यान्ति योऽर्हन्स नोऽव्यात् ॥ ४३

अत्र न नीरसार्थप्रतीतिः ॥ एवं चमत्कारप्रतिपत्तावपि पाकद्वयमिदं द्रष्टव्यम् ॥ पुनरन्येऽपि पाका यथासम्भवमूह्याः ॥ अथ सामग्री निरूप्यते ॥

शोभा साहाय्यकारिण्यमहात्मन इव चारुवेषा रीतय स्युः ।
शौर्याद्या या गुणा स्युः पदमथ नु गुणान्त्येऽद्भुता तु शय्या ॥
शब्देऽर्थालङ्कृतिर्वाप्यलङ्कृतिरपि वा भूषयो भूषणे वा ॥
पाकाः पाकक्रमाज्ञानमिति वृतिः सत्काव्यसामग्र्यमेवं स्यात् ॥ ४४

साहायक विना शोभा अत्यन्तमपीत्यर्थः रत्नानि इव रीतयः शौर्यादय इव शोभावर्धा गुणाः मार्गैव पदानुगुण्यविश्रान्तिः शय्या ॥ अर्थनिरूपणात्पूर्वं वचनं विचार्यते ॥ तथा

शब्दः पदं च वाक्यं च महावाक्यं तथा पुनः ॥
महावाक्यमिति प्रोक्तं वचनं काव्यवेदिभिः ॥ ४५ ॥
विषयः पुराणेतिहासाभ्यां च शास्त्रीय शब्द उच्यते ॥
तद्वेदाङ्गार्थसम्बन्धो भेदेन त्रिविधा पुनः ॥ ४६ ॥

शास्त्रीय इति शास्त्रशब्दोक्तेरभिधानतिरुक्तिः ॥ एतावता लिङ्गरूपानुपस्थित प्रकृतिः शब्दः ॥ शब्दो यथा -

निर्योगास्फुटयोगाभ्यां योगाभासाभिधाऽऽदिमः ॥
ते च भूवादिवृक्षादिमण्डपाद्याः क्रमान्मताः ॥ ४७ ॥

प्रकृतिप्रत्ययविभागो योग इष्यते । यस्मादर्थे शब्दो युज्यते स योग इति व्युत्पत्तेः ॥ निर्योगो भूवादिः । न हि सत्तायां कयाचिद्व्युत्पत्त्या भूशब्दः प्रवर्तते ॥ योगः कश्चिद्विद्यमानोऽप्यस्फुटः । स हि वृक्ष इत्यत्र भूमौ वृश्चतीति व्युत्पत्तिः कस्यचिज्ज्ञायते ॥ योगाभासो मण्डपादिः ॥ मण्डं पिबतीति विद्यमानाऽपि व्युत्पत्तिर्यथार्थप्रवृत्तेराभासरूपा ॥ मण्डपायित्वाभावात् मण्डपो न हि । अपितु मडु भूषायां मण्डनं मण्डः तं पातीति व्युत्पत्त्यर्थं घटते ॥

शुद्धतन्मूलमाभिन्नभेदैस्त्रेधा स यौगिकः ॥
ते च स्थितिलसद्दीप्तिमार्कण्डेयादयः क्रमात् ॥ ४८ ॥

स्थानं स्थितिरित्यत्र शुद्धो योगः ॥ निर्योगः प्रकृतिप्रत्ययोत्पन्नत्वात् ॥ लसद्दीप्तिरिति यौगिकमूलम् । लसद्दीप्तिशब्दाभ्यां शुद्धयौगिकाभ्यां निष्पन्नत्वात् ॥ अयं तु विशेषः ॥ समासशब्दे प्रकृतिमात्रजन्यो योगः । अथवा प्रत्ययोत्पयोगस्याप्यस्ति ॥ मार्कण्डेयशब्दस्तु सम्मिश्रः ॥ मृकण्डुरपत्यमिति योगस्य अव्यक्तयोगमूलमृकण्डुशब्दनिष्पादनात् ॥ रूढयौगिकयोर्मिश्रं मन्यते ॥

अन्तिमोऽन्योऽन्यसामान्यविशेषपरिवृत्तिजः ॥
जलधिर्जलद पृथ्वीधरोऽपि क्ष्माभृदः ॥ ४९ ॥

अन्योन्यमिति कोऽर्थः ? सामान्यस्य विशेषतया परिवृत्तिः विशेषस्य तु सामान्यरूपतया ॥ यथैक एव भेदः परिवृत्तिद्वयं तु हेतुवशात् ॥ जलमिति धीयतेऽस्मिन्निति योगस्य सामान्यार्थस्यापि विशेषार्थवृत्त्या समुद्र एव न तडागादि । जलदशब्देन तु मेघ एव न दात्रादिः ॥ क्षितिधर इति वदि । क्षितिधारणविशेषस्य सामान्यरूपतया परिवृत्तौ क्षितिधरशब्दः समुद्रस्याप्युपपन्ने ॥ पृथ्वीधरविशिष्टस्य यदि पृथ्वीधरत्वं क्षितिधरत्वं च विशिष्टेनार्थवत्त्वम् ॥ एवं यदि क्ष्माभृत्त्वं भूधर इति ॥

सुप्तिङन्तं पदम् । पदसमूहोऽर्थसमाप्तिमान् वाक्यम् ॥ उदाहरणम्— वीरमौलिर्नृपतिः पुण्यमूर्तिर्भो मुदितमाप प्रजाः ॥ अर्थसमाप्तियुक्ता-पदसमूहरूपः खण्डवाक्यम् । अर्थसमाप्तियुक्त इत्यनेन वाक्यनि-रासः । पुनरर्थसमाप्तियुक्त इत्यनेन समासपदनिरासः ॥ समासोपयुक्तः समासपदविशेषो पुनरर्थः ॥ उदाहरणम्— देवानां प्रिय इति एक पदसमूहरूपमात्रेऽपि न खण्डवाक्यम् ॥ अन्यादौ खण्डवाक्यानि खण्डवाक्यानि मुक्तिमार्गेऽन्वय एव वाक्यानीति स्थितिः ॥ एकार्थवैलक्षण्यान्यनेकानि वाक्यानि महावाक्यम् ॥ उदाहरणम्—

चन्द्रमसं मौलौ यद्गुणकान्ति । व्योम्नीति सरसा प्रवर्तिनुकान्तः ॥
यशोरूपं दिशि स्फुरन्ति । कृष्णोऽपि पक्षे दिव वैरवाणि ॥ ५०

वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधोऽर्थः । वाचकलक्षकव्यञ्जकत्वेन श-ब्दानां त्रैविध्यात् ॥ व्यङ्ग्यार्थ एव तात्पर्यार्थः । न पुनश्चतुर्थः ॥ शब्दवृत्तयस्त्रिधा अभिधालक्षणाव्यञ्जनाभेदात् ॥ लक्षणाविशेष एव गौण-वृत्तिः । तयोरुपचारमूलत्वाविशेषात् ॥ गङ्गा मुख्यस्तटो लक्ष्यो व्यंग्यः शीतत्वादिकम् ॥ सिंहो माणवक इति केचिदिच्छन्ति ॥ अत्र तु मुख्यो वाच्य एव ॥ सिंहो माणवक इति सादृश्यसम्बन्धविशिष्टमाणवकप्रतीति-गौणो लक्ष्य एव ॥ मुख्यार्थविषया शब्दव्यापृतिरभिधा । सा रूढा-दिभेदात्मिका । वाच्यार्थघटनेन तत्सम्बन्धिनि समारोपितशब्दव्यापारो लक्षणा ॥ सा द्विधा सादृश्यहेतुका सम्बन्धान्तरहेतुका चेति ॥ सम्बन्धा-न्तरहेतुकाऽपि द्विधा । जहद्वाच्या अजहद्वाच्या चेति ॥ सादृश्यहेतुका द्विधा । सारोपा साध्यवसाया चेति ॥ एवं लक्षणा चतुर्धा ॥ तत्र जहल्लक्षणा यथा—

उत्पन्ने पुरुदेवेऽत्र त्रिलोकीरक्षणक्षमे ॥
नृत्यद्वायज्जगज्जात रोमहर्षणजृम्भितम् ॥ ५१ ॥

जगतोऽचेतनस्य नाट्यगात्रविक्षेपासम्भवाद्वाच्यस्याभावः ॥ अजहल्लक्षणा यथा—

परो समयमत्यन्तरायित सिंहविहरम् ॥

अलञ्चक्रुः किरीटानि नानारत्नमरीचिभिः ॥ ५२ ॥

अत्र अलङ्कारनिह्नवं किरीटैराश्रयभूता इन्द्रादयो लक्ष्यन्ते ॥ विषयवि-षयिणो रूपयोरभेदनिश्चितिरारोपः सारोपलक्षणा यथा—

चक्रिरूर्ध्वीरवः शौर्यसम्पदन्वितविग्रहः ॥
परिपन्थिमहादन्तिनिवहभ्रमण व्यधात् ॥ ५३ ॥

अध्यवसायो विषयनिगरणेनाभेदप्रतीतिः । साध्यवसायलक्षणा यथा—

इक्ष्वाकुकुलवाराशिपूर्णेन्दु शिशिरद्युतिः ॥
अभूदेष प्रजानां पक्करणश्रमस्करः ॥ ५४ ॥

मानेन इन्दुत्वेनाध्यवसीयते । इक्ष्वाकुकुलवाराशीत्यारोपश्च ॥ अनुगतेषु वस्तुषु वाक्यार्थोपस्काराय भिन्नार्थगोचरः शब्दव्यापारो व्यञ्जनावृत्तिः । सा त्रिधा । शब्दशक्तिमूला अर्थशक्तिमूला उभयशक्तिमूलेति क्रमेण यथा—

वाहिन्यो व्यातमदिन्यः [illegible] कृतसम्भ्रमाः ॥
कबन्धापूर्णमानेन [illegible] ॥ ५५ ॥

अत्र अर्थसद्भावादिना [illegible] योरभिमताया चित्तसमन्वदाह- यानुकूल्य [illegible] शब्दशक्तिमूलेति निम्नगानां प्रतीतत्व इति [illegible] पर्यवसिता अप्रकृतार्थ [illegible] अर्थं कविना विवक्षी- यत्वात् । [illegible] ॥

[illegible] ॥
[illegible] ॥ ५६ ॥

[illegible] ॥

[illegible] ॥
[illegible] ॥ ५७ ॥

[illegible] ॥

व्याख्यानादनन्तयोगेन इत्यत्र शब्दशक्तिमूलत्वम् ॥ सर्वलोकभासकविग्रहः सर्वश्लाघ्यमानमहागुण इत्यर्थशक्तिमूलत्वमित्युभयशक्तिमूलः पुष्करव्योरुपमालङ्कारध्वनिः ॥

रसावस्थानसूचिन्यो वृत्तयो रचनाश्रयाः ॥
कैशिकी चारभट्यन्या सात्वती भारती परा ॥ ५८ ॥

वृत्तयस्तु चतस्रो रचनाश्रितत्वेन रसावस्थितिसूचिताः । रसरहितवर्णनरचनाया दोषत्वेन प्रसिद्ध रचनाया अपि रसव्यञ्जकत्वम् ॥

द्रावयन्त्यसुकोमलौ च करुणः शृङ्गार इत्याद्ययौ ।
द्वौ बीभत्सरसोऽपि रौद्र इति तावत्युद्धतौ भाषितौ ॥
ईषत्प्रौढरसौ भयानकरसो वीरोऽपि सम्भावितौ ।
स्युः किञ्चित्सुकुमारभावनियता हास्यश्च शान्ताद्भुतौ ॥ ५९ ॥

अत्यन्तमृदुसन्दर्भैः शृङ्गारकरुणौ रसौ ॥
वर्ण्येते यत्र धीमद्भिः कैशिकीवृत्तिरिष्यते ॥ १६० ॥

वृषभनृपतिकाय. कान्तसूराशुहारी ।
मृदुललिततनुना लोचनं कामिनीनाम् ॥
स्खलमृदुलमगांजे सागगन्ध किरद्भिः ।
सुरधरणिधरो वा मन्मथो हेमकान्तिः ॥ ६१ ॥

वर्ण्यते रौद्रबीभत्सौ रसौ यत्र कवीश्वरैः ॥
अतिप्रौढैस्तु सन्दर्भैश्चारभटी यथा ॥ ६२ ॥

स्फूर्जच्छात्रवविच्छिद्यारुड्डनलज्वालौघमावर्पना ।
स्फूर्जन्त्वदुग्रविघट्टनोद्भवलसत्स्फारस्फुलिङ्गव्रजैः ॥
गर्जन्मर्पानिभमरूढवपुषा धीमज्ञेन द्विपः ।
द्विच्छिन्नाशा सवदसजालकालिना भूनाधजीर्ण व्यधु ॥ ६३ ॥

ईषत्प्रौढौ निरूप्येते यत्र वीरभयानकौ ॥
अनतिप्रौढसन्दर्भात्सात्वतीवृत्तिरुच्यते ॥ ६४ ॥

विश्वत्राणसमर्थजन्तुनिधिपप्रस्थानभेरीध्वनिः ।

श्रुत्वा घोरमहाशनीयितममी प्रत्यर्थिनः पार्थिवाः ॥
सन्त्रासज्वरपूर्णकर्णबधिराः शीघ्रं गताश्चक्रमृ- ।
चेजोदुन्दुभिनादवाडवमहानिर्घोषमम्यम्बुधिम् ॥ ६५ ॥
हास्यशान्ताद्भुता ईषत्सुकुमारा निरूपिताः ॥
यत्रेषत्सुकुमारेण सन्दर्भेण हि भारती ॥ ६६ ॥
त्वं शुद्धात्मा शरीरं सकलमलयुतं त्वं सदानन्दमूर्ति- ।
र्देहो दुःखैकगेहं त्वमसि सकलविस्कायमज्ञानपुञ्जम् ॥
त्वं नित्यश्रीनिवासः क्षणरुचिसदृशाशाश्वतेकान्तमत्तं ।
मा गा जीवात्र रागं वपुषि भज निजानन्दसौख्योदयं त्वम् ॥६७

मध्यमारभटी मध्यकौशिकी द्वे इमे पुनः ॥
वृत्ती रसेषु सर्वेषु स्यातां साधारणे मते ॥ ६८ ॥
अनतिप्रौढसन्दर्भो मृदुलार्थेऽपि मध्यमा ॥
कौशिकी विपरीताऽतो मध्यमारभटी यथा ॥ ६९ ॥

ईषत्प्रौढरचना अतिसुकुमारयोः शृङ्गारकरुणयोर्न दुष्यति किन्त्वतिकठिन रचना मध्यमारभटी ॥ अतिप्रौढयोरपि रौद्रबीभत्सयोरल्पसुकुमारसन्द न दुष्यति । किंत्वतिमृदुरचना विरुध्यते ॥ मध्यमकौशिकी यथा—

सर्वासभायां चतुरङ्गकेलौ । चुचुम्ब सरक्षितुमाहृतस्य ॥
हृयस्य याच्ञा कपटेन कामी । मुहुर्मुहुः स्मेरमुखी कपोले ॥७०

मध्यमारभटी यथा—

यस्याभिघाराविनिपातभीता- । स्त्यजन्तु पद्माकरसाधगानि ॥
निमुक्तवन्त किल राजहंसाः । स्वमुत्तराशाश्रितमानसा च ॥ ७१ ॥

एवं रसेषु सर्वत्रोदाहार्यम् ॥ वैदर्भीप्रभृतिरीतीनामर्थविशेषनिरपेक्षत्वेन शब्दगुणाश्रयाणां केवलरचनासौकुमार्यप्रौढत्वमात्रगोचरत्वात् कौशिक्या दिवृत्तिभ्यो भेदः । अयंयुक्तकोमलाक्षरबन्धोऽतिसुकुमारसन्दर्भ उच्यते । परस्परानिकटबन्धत्वमतिप्रौढत्वम् ॥ संयुक्तसुकुमारवर्णैरगम्भीरमृदुत्वम् । इषत्प्रौढत्वनिकटसन्दर्भरचनत्वं ॥ शोभामाह—

शोभा सिद्धोऽपि चेद्दोषो गुणयुक्त्या निषिध्यते ॥
वृथा निन्दन्ति संसारं यत्र चक्री मपूज्यते ॥ ७२ ॥

सिद्धोऽपि संसारस्य दोषो भरतेशमनुजागुणसङ्कीर्तनेन निषिध्यते ॥

गौणागौणास्फुटत्वेभ्यो व्यंग्यार्थस्य निगद्यते ॥
प्राधान्यस्य तु निषेधोऽयं तेषा मध्यो वरोऽपरः ॥ ७३ ॥

व्यंग्यस्यातुल्यत्वेन मध्यमकाव्य गुणीभूतव्यंग्यमित्युच्यते ॥ प्राधान्ये उत्तमं काव्यं ध्वनिरितीष्यते ॥ अस्फुटत्वे अधम तत् चित्रमिति निरूप्यते ॥ तथाहि ।

परलब्धमूर्धवनितां नवोढा- । मालोकमाने निधिपे सुपीठे ॥
निष्ठ्यर्थैरवनीधरैस्त- । त्कार्यं व्यधायि प्रमदोऽस्य येन ॥ ७४ ॥

उत्तराज्याभिषेकस्य भरतेशिनोऽमेऽवनीशानां शरणार्थिनां स्वोचितकार्पण्यवचनं प्रणमनादिक व्यंग्य तत्कार्यं व्यधायीति वाच्यादतिशयाभावेन गुणीभूतव्यंग्यत्वम् ॥

चन्द्रस्य निष्कलङ्कस्याब्धेर्गाधस्य कुलभूभृताम् ॥
नीरे किं कारणं नाति सृष्टश्चक्री विरञ्चिना ॥ ७५ ॥

चक्रिणश्चन्द्रातिशायि सकलकलापूर्णत्वमम्बु रातिशायि गाम्भीर्यं कुलाचलातिशायि समुन्नतत्वं च व्यज्यते ॥ कलानिधिजलनिधिकुलाचलनिर्माणसम्भ्रमातिशायिनिश्चक्रिनिर्माणविधौ सरम्भवतीति व्यज्यते ॥ चित्रं शब्दार्थोभयभेदेन त्रिधा यथा—

किं मर्त्यव्यभिनव भकम्परो दुष्कर्मगर्भव्रण ।
किं तु स्वज्ज्वलनावलीविलसितैर्नो लिहि देहश्रियम् ॥
किं गर्जत्प्रमथोग्रवरव नाकर्णयात्तिर्णय ।
येनाय न जहाति मोहविहिता निद्रामसन्दा जन ॥ ७६ ॥

अर्थचित्रं यथा—

१ धनमारुकाणां समूह ।

निपीड्य लक्ष्मीमपहृत्य चक्रिरे । ठकाः स्वकं जीवनमात्रशेषकम् ॥
यदीदृशायास्त्यपहर्तुमित्यगा– । दर्पान्निधिर्वेपथुमूर्मिभिर्न तु ॥ ७७ ॥
जन्माभिषेकाय क्षीरानयनार्थं सुरेष्वागच्छत्सु सत्सु वारिधिरेवमभूत् ॥

अरिष्टहर्म्यस्य सवज्रवेदे- । र्नीलाश्मनीलद्युतिपूरितस्य ॥
मध्ये विरेजुर्नवदीपमाला । माला मणीनामिव वारिराशेः ॥ ७८ ॥

अनुप्रासोपमाभ्यामुभयचित्रता ॥ ध्वनिविशेषं न ब्रूमो विस्तरत्वात् ॥
संयोगादिभिरनेकार्थवाचकः शब्दोऽभिधामूलः अवाच्यं व्यनक्तीति व्यञ्जनविशेष उच्यते ॥

संयोगोऽर्थविरोधिते प्रकरणं स्यात् विप्रयोगौचिती ।
सामर्थ्यं स्वरसाहचर्यपरशब्दाभ्यर्णताव्यक्तयः ॥
देशो लिङ्गमतोऽपि काल इह चेष्टाद्याः कवीनां मताः ।
शब्दार्थेष्वनवच्छिदे स्फुटविशेषस्य स्मृतेर्हेतवः ॥ ७९ ॥
सदम्भोलिर्हरिर्भातीत्यत्र संयोगतः सुरेट् ॥
स स्याद्वादे जिन सेव्य इत्यर्थाद्वार्हती मतिः ॥ १८० ॥
हरिः पलविरोधीनां विरोधाच्चन्द्रमा मतः ॥
मां वेत्ति देव इत्युक्ते सम्मुखात्मत्यता गतिः ॥ ८१ ॥
अरविर्हरिरित्यस्माद्योगात्कृष्ण प्रतीयते ॥
औचित्यात्म जिनोऽव्याद्व इति सम्मुखता गतिः ॥ ८२ ॥
कोकिलो रौति चेत्युक्तिसामर्थ्यान्मधुमासधीः ॥
वेदे स्वरेण चान्येऽर्थधीर्न चेति कुदृष्टयः ॥ ८३ ॥
साहचर्येण कृष्णः स्यात्सीरिमाधवयोरिति ॥
राजा सम्योऽस्ति इत्यस्य शब्दसान्निध्यतो विधौ ॥ ८४ ॥
अभात्मित्रमिति व्यक्त्या सुहृदो निश्चयो मतः ॥
अभान्मित्र इति व्यक्त्या सूर्यसम्बन्धनिश्चयः ॥ ८५ ॥
देवोऽत्र भाति चेत्युक्ते देशाद्दवनिरस्मृतिः ॥
भंगज्ञो मीनकेतुः स्यादिति लिङ्गात्स्मरस्मृतिः ॥ ८६ ॥

वानिति वचनात् ॥

यदुक्तमप्रसिद्धार्थे तद्गूढार्थमिदं यथा ॥
मित्रोदयोऽब्जसङ्घातं विकासयति सर्वतः ॥ ९६ ॥

मित्रशब्दः सुहृदर्थे प्रसिद्धः सूर्ये दुष्यति ॥

विपरीतार्थधीकारि यद्विरुद्धाशयं यथा ॥
भूतलोपकृदादीशः प्रथमो तीर्थकृज्जिनः ॥ ९७ ॥

भूतानां जीवानां लोपं करोतीति विरुद्धार्थमतिकृत् ॥

यत्पामरप्रयोगे तु प्रसिद्धं ग्राम्यमिष्यते ॥
योषितो गल्लमालोक्य दर्पणं स्मरति स्म सः ॥ ९८ ॥

गल्लशब्दस्य कपोलवाचकतया ग्राम्यप्रयोगः ॥

यत्रार्थनिश्चयो दूरदूरः क्लिष्टमिदं यथा ॥
जिनो शर्वादिपरापीडसमुत्पत्तिस्थलोद्भवाम् ॥ ९९ ॥

ईश्वरस्यापीडचन्द्रसमुत्पत्तिस्थलं समुद्रस्तत्र जाता लक्ष्मीमित्यतिदूरत्वम् ॥

कविभिर्न प्रयुक्तं यदप्रयुक्तं मतं यथा ॥
प्रमाणाः पुरुषाः सर्वे स्याद्वादन्यायवेदिनः ॥ २०० ॥

प्रमाणा इति कविप्रयोगाभावः ॥

अर्थसन्दिग्धकारि स्यात्सन्दिग्धमिदं यथा ॥
जायते नितरां क्रीडा नितम्बेषु महीभृताम् ॥ १ ॥

राज्ञां स्त्रीजघनेषु क्रीडा ॥ आहोस्विद्गिरीणां सानुष्विति संशयात् ॥

अपुष्टार्थमपुष्टार्थं [illegible] यथा ॥
सोऽत्र सर्गान्तरेऽन्यत्र कृतान्तस्य महारिपुः ॥ २ ॥

[illegible] महानतिमुनि ॥ पक्षे अथ सर्गान्त इत्यत्र धर्मे [illegible] ॥ कृतान्तस्य तत्र इत्यत्र यमार्थनिरसनान्निरर्थकं [illegible] इति [illegible] विरुद्धमिति [illegible] ॥

[illegible] यथा ॥
[illegible] ॥ ३ ॥

विश्रान्तिभ्रंशनं यत्र यतिभ्रष्टमिदं यथा ॥
जिनेशपदयुग्मं वन्दे भक्तिभरसन्नतः ॥ १३ ॥
शब्दो वाऽर्थोऽक्रमो यत्र क्रमभ्रष्टमिदं यथा ॥
सुप्त्वा स्नात्वा गुरुं नत्वा जिनं कश्चित्प्रवन्दते ॥ १४ ॥

अर्थाक्रमः ॥

गम्भीरिमोन्नतिद्वन्द्वे ममौ मेरूदधी अपि ॥

शाब्दोऽक्रमः । गम्भीरत्वे उदधिरौन्नत्ये मेरुरिति शब्दक्रमाभावात् ॥ गम्भीरिमौन्नत्ययोर्मेरूदधी इति यथोचित्यमर्थान्वये सिद्धे अर्थविरोधो न किन्तु शाब्द एव क्रमभंगः ॥

क्रियापदेन हीनं यदशरीरं मतं यथा ॥
सीतानरीश्वरांगेशः षट्खण्डपरिरक्षकः ॥ १५ ॥
असद्गब्दस्थानर्थं यच्छब्दहीनमिदं यथा ॥
सुखं संगच्छते नात्र विषयान्ध्यासच्युतमनः ॥ १६ ॥

सुखं न संगच्छते इति पदद्वयनञ्योगे दोषनिश्चयाद्वाक्यदोष एव न पददोषः ॥ समस्तस्य गम्यतोऽध्यात्मनेपदत्वे कर्मकारकस्यासद्भावनीयमानत्वात् ॥

अनन्वयमिहोक्तमसत्सम्बन्धच्युतं यथा ॥
पीठं शिक्षा यशो राजा प्रतापो भूमिरन्धकः ॥ १७ ॥
वक्तव्यं यत्र यन्नोक्तं वाच्यच्युतमिदं यथा ॥
मतं जिनमस्माकं दुःखेशावर्ज्जिनाम् ॥ १८ ॥

दुःखेशावर्ज्जिनामपि अभिनन्दे वक्तव्ये नोक्तः ॥

सन्ध्यभावो विरूपो वा सन्धिच्युतमिदं यथा ॥
पिता इह अस्य त्वां पातु श्रेष्ठपुरे जिनः ॥ १९ ॥

सुमनसौ हरिचन्द्रादित्यौ श्रेष्ठ इति सन्धिविरूपता ॥

निर्दोषत्वे विरुद्धीनां कार्ये व्यर्थमतिस्मृते ॥
पुरुषान्वयदूतं परस्तिरस्करनमाश्रितः ॥ २० ॥

वस्तुनो विपर्यासे पर्यायविपर्ययः ॥

दशवं दशरथस्यो पौलस्त्य च मनुसम्भितिकम् ॥

भानुसमाने सिन्धु गाम्भाल्यानिवेदितश्विनि ॥ २१ ॥

समासो नैमित्तो यत्र समस्तपदमानकम् ॥

पुनोऽस्मासु विविधैर्त्तितिरि रक्षस्वचाननाः ॥ २२ ॥

हंसस्यत्र विश्वसो सिविशेति समस्ते गुम्फना विपूर्वा वचने न समासः ॥

हंसे तु कविवचने समासः कृतः इत्यस्यासम्बन्धमासः ॥

विगर्हो कृत्या यत्र मोरदोषं च वाञ्छुयात् ॥

मोक्षे द्युतविगर्ही तद्वाक्यदोषविद्या यथा ॥ २३ ॥

मनोहरेते मनोर्निन्दो परो धर्मो जितेन्द्रिय ॥

पूज्या कन्या परा धीरा गण्या धीरा जिता इमे ॥ २४ ॥

द्वारीदे पोतस्य विगर्ह्य वस्तुभाऽन्यत्र तु लोपः ॥

अन्यवाक्यपदादीनि यत्र सङ्कीर्णानिष्यते ॥

सङ्क कार्लीन महाद्री यशो बाभाति दिगन्तरम् ॥ २५ ॥

यशो दिगन्तरं प्राप्नोति महाद्रे. महद्गो बाभातीति वाक्यद्वयपदानां परस्पर-सङ्कीर्णता ॥

यस्य वाक्यान्तर मध्ये भवेद्वाक्यपदान्तरम् ॥

जितनायको विनु गेऽन्द्रुमो रक्षार विश्वम् ॥ २६ ॥

जितनोक. ... वाक्यमध्ये से विधुरनादिति भिन्नवाक्य-भेदः ॥

पदप्रकरणमनन्यात्मकार्पो विसन्धो यथा ॥

धारदेशे पलद्वयाभे विन्ध्यारण्येऽरयास्थिता ॥ २७ ॥

समलद्वयाभे पलायमानहरिणे इति वक्तव्ये न तथोदितम् ॥

प्रारब्धनियमत्यागि भिन्नप्रक्रमकं यथा ॥

गुञ्जा मुक्ता लता कान्ता विन्ध्यारण्य पुरं द्विषाम् ॥ २८ ॥

बहुवचनत्वेन प्रारम्भे विन्ध्यारण्य पुरमित्येकवचने प्रक्रमभङ्गः ॥

न्यूनं यत्रोपमानं तन्न्यूनोपममिदं यथा ॥
श्रीबाहुनखसंपीडोऽरिर्वने कण्टकभेदवान् ॥ २९ ॥
स्ववध्या बाहुभ्यां नखैः सम्पीडितश्शत्रोरिः तद्भयादरण्ये कण्टकैः पीड्यत
इत्यत्र नखस्थाने कण्टकवचनं बाहुस्थाने किमपि नोक्तमिति न्यूनोपमात्वम् ॥
उपमानाधिकत्वं तदधिकोपमकं यथा ॥
म्लानास्याऽरिवधूर्भाति म्लानाऽब्जोत्पलसिन्धुवत् ॥ ३० ॥
म्लानवक्त्राया शत्रुरिपुयोषितः उपमाभूतायां नद्यां म्लानाब्जमात्रं वक्तव्यं
म्लानोत्पलमित्याधिकम् ॥
वाक्येऽधिकपदानि स्युर्यत्राधिकपदं यथा ॥
धर्मं प्रणयति प्राज्यं धर्मराजस्तथागतः ॥ ३१ ॥
लिङ्गोक्तिं चोपमाभिन्ने भिन्नलिङ्गोक्तिकद्वयम् ॥
मनो गम्भीरमब्धिर्वा हारास्ते निर्झरा इव ॥ ३२ ॥
समाप्तपुनरात्तं स्यात्समाप्तस्वीकृतिः पुनः ॥
बहुदुःखास्पदेऽरण्ये तिष्ठाम क्रूरभल्लुके ॥ ३३ ॥
बहुदुःखास्पदेऽरण्ये तिष्ठाम इति समाप्य क्रूरभल्लूक इति पुनः स्वीकारात् ॥
क्रियान्वयो न सम्पूर्णो यत्रापूर्णमिदं यथा ॥
स्वभ्रेऽस्माकं स्थितिः क्रूरे सत्वान्पश्यन् जिनः स्थितः ॥ ३४ ॥
नारकक्रूरान्पश्यान् नरकत्रासानसान्पश्यन्निति वक्तुमिष्टो न सम्पूर्णः ॥
एकाप्यर्थभिन्नाऽक्रमपरुषगतालंकृतीन्यप्रसिद्ध- ।
सादृश्यं हेतुशून्यं विरसमहचरभ्रष्टके संशयाढ्यम् ॥
अश्लीलं चातिमात्रं विसदृशसमताहीनसामान्यसाम्ये ।
लोकाद्युक्त्या विरुद्धं स्युरिति कविमतेऽष्टादशैतेऽर्थदोषाः ॥ ३५ ॥
अभिन्नार्थकमुक्तेन यदेकार्थमिदं यथा ॥
तुष्टः पीनस्तनीं दृष्ट्वा हृष्टो वीक्ष्य पृथुस्तनीम् ॥ ३६ ॥
वाक्यार्थरहितं यत्तदपार्थमिह तद्यथा ॥
दाराः के मेरुरुत्तुंगो नद्यः शुक्रास्तु के गजाः ॥ ३७ ॥

[illegible] न पुनः ॥

[illegible] यथा ॥

[illegible] ॥ ३८ ॥

[illegible] सहृदयाः [illegible] न [illegible] ॥

[illegible] यथा ॥

[illegible] ॥ ३९ ॥

[illegible] सम्पूर्णस्य च न [illegible] ॥

पूर्वोक्तस्यापि [illegible] ॥

अन्यदाहृत्य [illegible] दिशो दिशु ॥ ४० ॥

अत्र [illegible] पूर्वकाव्यवचनात् ॥

[illegible] वर्णितं यथा ॥

हिमवत्पार्श्वे [illegible] ॥ ४१ ॥

[illegible] यथा ॥

[illegible] सुरक्रमः ॥

[illegible] ॥ ४२ ॥

स्वभावोक्तिरपि न [illegible] ॥

[illegible] यथा ॥

[illegible] योषिताम् ॥ ४३ ॥

मुग्धानां [illegible] न प्रतिष्ठानि ॥

यत्रार्थकथनं हेतुरहितं हेतुशून्यकम् ॥

दृष्टे [illegible] विहर्तुं न क्षमा वयम् ॥ ४४ ॥

पुन इत्युक्ते हेतुना [illegible] ॥

[illegible] तद्विरसं यथा ॥

[illegible] ॥ ४५ ॥

[illegible] इति विरसत्वम् ॥

कुचकुम्भग्रहणेन दोर्भ्यां वेल्लनेन च ॥
धन्यस्तां वधूं तन्वीं किम्पुरुषोऽपि रमुदम् ॥ ५६ ॥

स्वादीरोप. ॥

देवस्तु स्मरशरासनं स्मरशराब्दमदोद्यमा ॥
शृङ्गारमधुरं मन्दमालापं कुर्वन् रजनीम् ॥ ५७ ॥

निरन्नमरसस्य शृङ्गाररसे दुष्यति ॥

शान्ता परिवर्ततरे मैत्र्यां बलीयस्याश्रितान् ॥
कन्दर्पवृत्तान्तोऽनुभवन्ती मनोहरा ॥ ५८ ॥

अत्र रसादिभावे स्थायिस्वशब्दे दुष्यति ॥

कुसुमायुधवाणसुधानां परम्परम् ॥
इत्यादाने इव सम्पाद्भूदुत्साहोऽन्यदुर्लभः ॥ ५९ ॥

अत्र रसादिभावस्योत्पादस्य स्वशब्दवाच्यत्वेन दोषः ॥

इति जहाति बुद्धिं स्वां मूर्च्छति स्खलति स्फुटम् ॥
करोति परिपूर्तिं च सैन्याऽऽलीनामभूद्वचः ॥ २६० ॥

अत्र रसादित्यागस्य करणेऽपि सम्भवाद्विप्रलम्भे रसादित्यागानुभावस्य कष्टकल्पना ॥

भाग सादरं परमात्मं प्रसीद प्रियमाऽत्र ॥
शुष्के गलति कालोऽत्र पटीयन्तजलं यथा ॥ ६१ ॥

कालस्यानित्यस्य शान्तरसेऽनुभाव स च शृङ्गारे मोक्ष इति प्रतिकूलग्रहणम् ॥ इत्यादयो रसभावगता दोषा बोध्याः ॥ अङ्गारस्योत्साहादिशब्दग्रहणं कश्चिदिष्यते तथा बहुधाप्रयोगात् ॥

क्वचित्क्वचित् चित्रादौ दोषा एव गुणा यथा ॥
ग्रासमध्येऽपि षड्वर्गं व्यञ्जनायापि सज्जनम् ॥ ६२ ॥

निरर्थपदोदाहरणकाव्यमेकं कृत चेत्परुषमपि न दुष्यति ॥

यमकश्लेषचित्रादौ द्व्यक्षरादिनिबन्धने ॥
क्लिष्टासमर्थनेयार्थपदादि न च दुष्यति ॥ ६३ ॥

अनेकेषां पदानां तु यत्रैकपदवत्स्फुटम् ॥
भासमानत्वमाख्यातः श्लेषाख्यः कविनागुणः ॥ २७० ॥
अशरणमशुभमनित्यं दुःखमनात्मानमावसामि भवम् ।
मोक्षस्तद्विपरीतात्मेति ध्यायन्तु सामयिके ॥ ७१ ॥

अत्र पठनसमये बहूनां पदानामेकपदवदवभासनं न तु पदच्छेदकरणकालादौ ॥

यावतो वर्तते वाच्यं यत्र तद्वाचिकं यथा ॥
तावदर्थपदत्वं यत् सम्मितत्वगुणो यथा ॥ ७२ ॥

श्लेषादिगुणानां मध्ये केषांचिद्दोषपरिहारद्वारेण गुणत्वम् ॥ केषांचित्तु स्वत एवोत्कर्षवर्धित्वेन गुणत्वम् ॥ तत्र ये स्वत एव चारुत्वातिशयहेतवः सन्ति ते गुणाः ॥ को गुणः कस्य दोषस्य परिहाराय प्रभवतीत्युक्ते तत्र तत्र गुणलक्षणप्रतिपादनप्रस्तावे निगद्यते ॥ यावत्प्रयोजनमस्ति तावत्प्रयोजनपदत्वं सम्मितत्वं न्यूनाधिकपदपरिहाराय तत् ॥

इत नाथ रथाङ्गेन विनीतानगरीपते ॥
लवणाम्बुधिमेतं त्वं पश्य पश्य महामते ॥ ७३ ॥

अत्र प्रीतिस्वरूपप्रतिपादनात् नाथेति वाक्यवृत्तिः ॥

यावन्ति जिनचैत्यानि विद्यन्ते भुवनत्रये ॥
तावन्ति सततं भक्त्या त्रिःपरीत्य नमाम्यहम् ॥ ७४ ॥
रचनाया अवैषम्यभणनं समता यथा ॥
प्रक्रान्तरीतिभङ्गस्य परिहाराय सा मता ॥ ७५ ॥
च्यवनिजनगतानां कृत्रिमाकृत्रिमाणां ।
वनभवनगतानां दिव्यवैमानिकानाम् ॥
इह मनुजकृतानां देवराजार्चितानां ।
जिनवरनिलयानां भावतोऽहं स्मरामि ॥ ७६ ॥

अत्र पादचतुष्केऽपि तुल्यरचनात्समत्वम् ॥

पतत्प्रकर्षदोषस्य हानये रीतिरुच्यते ॥ ७७ ॥
चन्द्रस्य निष्कलस्याभेर्गाढस्य कुलभूभृताम् ॥
नीचैः किं करणेनेति सृष्टश्रश्री विरिञ्चिना ॥ ७८ ॥
मुख्यार्थातिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनिः ॥
समस्तदुःपटच्छन्नजगदुद्योतहेतवे ॥
जिनेन्द्रांशुमते तन्वत्प्रभामामारभासिने ॥ ७९ ॥
भणितिर्या विदग्धानामसावुक्तिरितीर्यते ॥
अश्लीलपरिहाराय स्वीक्रियेताल साऽपि च ॥ २८० ॥
राजस्ते कमलासक्तिश्चित्रवृत्तेः समीक्षिता ॥
मा स्वक्काऽपि त्वया चारुकुमुदामासनं कृतम् ॥ ८१ ॥
पाठकालेऽपि वाक्येऽपि भिन्नभिन्नपदत्वतः ॥
यत्प्रतीयेत तत्प्रोक्त माधुर्य विदुषा यथा ॥ ८२ ॥
दानं ज्ञानधनाय दत्तमसकृत्पात्राय सद्वृत्तये ।
चीर्णान्युग्रतपांसि तेन सुचिरं पूजाश्च बह्व्यः कृताः ॥
शीलाना निचयः सहामलगुणैः सर्व समासादितो ॥
दृष्टस्त्व जिन येन दृष्टिसुभग श्रद्धापरेण क्षणम् ॥ ८३ ॥
वर्णकोमलता सानुस्वारत्व सुकुमारता ॥
हान्यै श्रुतिकटुत्वस्य दोषस्य कथिता च सा ॥ ८४ ॥
चन्द्रप्रभं चन्द्रमरीचिगौरं । चन्द्रं द्वितीयं जगतीव कान्तम् ॥
वन्देऽभिवन्द्यं महतामृषीन्द्रं । जिनं जितस्वान्तकषायबन्धनम् ८५
स्वरारोहावरोहौ द्वौ रम्यौ यत्र गतिर्यथा ॥
आरोप्यतेऽन्यधर्मोऽन्यत्र समाधिर्यथा पुनः ॥ ८६ ॥
सारा वाणी पुरुजिनपतेर्नाकिनाथाभिपूज्या ।
हीना दोषैरुरुनययुता मोक्षमार्गावभासा ॥
चञ्चच्छर्मप्रकटनमयप्रस्फुरच्छुद्धमुक्ति ।
तत्त्वज्ञप्तिं नयतु सकलं भव्यवृन्दं विगर्वम् ॥ ८७ ॥

पूर्वार्द्धे दीर्घाक्षरप्रचुरत्वात् स्वरस्यारोहः अपरार्धे ह्रस्वाक्षरत्वेन स्वर-स्यारोहः ॥

कीर्तिः पल्लविता लोके सुतस्य वृषभेशिनः ॥
मानो म्लानो द्विषां लोके तदाज्ञाया विरोधिनाम् ॥ ८८ ॥
रचनायामुज्ज्वलत्वं यत्काव्ये सा कान्तिरिष्यते ॥
ग्राम्यदोषनिरासाय स्वीकृता सा पुनर्यथा ॥ ८९ ॥

जयति भगवान्हेमाम्भोजप्रचारविजृम्भिता- ।
वमरमुकुटच्छायोद्गीर्णप्रभापरिचुम्बितौ ॥
कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणो ।
विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः ॥ ९० ॥

दृढबन्धत्वमौजित्यं विसन्धिविनिवृत्तये ॥

वन्दारुवृन्दपरिपट्टविलोलिताक्ष- ।
वृन्दारकेश्वरकिरीटतटापकीर्णे ॥
मन्दारपुष्पनिवहैर्विहितोपहारे ।
वन्दामहे जिनपतेः पदपद्मयुग्मम् ॥ ९१ ॥

वाक्यान्तरगतेऽत्रार्थे सम्पूर्णवाक्यता ॥
अर्थव्यक्तिर्गुणः सोऽयं सोऽस्पष्टार्थनिवृत्तये ॥ ९२ ॥

जयति जगदीशानन्तश्रीमन्निकल्पकल्पितार्थविधि ॥
जिनचरणकमलयुगल गणधरगणनीयनम्रदेवगणम् ॥ ९३ ॥

विकटाक्षरबन्धत्वं यदौदार्यं मतं यथा ॥

दोषान्वेषण तान्परतन्त्रतया प्रच्छाद्य गच्छाग्रय ।
सार्धं तेष्वादरमा कृते यदि गुरुः पश्चात्तवैतव्यय किम् ॥
तस्मान्मे न गुरुर्गुरुर्नरकाद्गत्वा तदैव स्फुट ।
मूले यस्तेन समस्य निपुण सोऽय मतः सद्गुरुः ॥ ९४ ॥

पदानामर्थचारुत्वप्रत्यायकपदान्तरैः ॥
मिलितानां यदाधानं तदौदार्यं स्मृतं यथा ॥ ९५ ॥

इति वाग्भटोक्तिरपीष्टा ॥

श्रीजिनायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं ॥
वाग्देवीरतिकेतनं जयरमाक्रीडानिधानं महत् ॥
स स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं ।
प्रातः पश्यति कल्पपादपदलच्छायं जिनांघ्रिद्वयम् ॥ ९६ ॥

श्रियो लक्ष्म्या विलासगृहं स प्रातः जिनपदयुगं दृष्ट्वा स्याद्भवेत् भवितुमर्हतीत्यर्थः ॥ स्यादित्यत्र तृच्यप् चार्हं इत्यनेन लेट् ॥

शब्दार्थयोः प्रसिद्धत्वं झटित्यर्थार्पणक्षमम् ॥
प्रसादः क्लिष्टदोषस्य परिहाराय स स्मृतः ॥ ९७ ॥
यस्य विज्ञानकोणस्थौ लोकालोकावणूपमौ ॥
तस्मै वीरजिनेन्द्राय नमस्तत्पदलब्धये ॥ ९८ ॥
शब्दानां गूढसञ्जल्परूपता सौक्ष्म्यमिष्यते ॥
समासबहुलत्वं स्यादोजोगुण इह स्फुटः ॥ ९९ ॥
णूश्रीञ्पूजनमः कर्मण्यत्र वृत्ता न कर्तरि ॥
जिने भिज्ञाभिदः कर्तर्येव कर्मणि नो मताः ॥ १०० ॥

जिनो नूयते श्रीयते पूज्यते नम्यते स्तवनीयः आश्रयणीयः पूजनीयो नमनीय एव न तु स पुनरन्यं नुवति श्रयति पूजयति नमतीति । नयति तत्त्वमुपदिशति जानाति भिनत्ति कर्माद्रिमिति गूढमन्तःसञ्जल्पनस्वरूपत्वेन सौक्ष्म्यम् ॥

जयति जगदीशमस्तकमणिकिरणकलापकल्पितार्घविधि ॥
जिनचरणकमलयुगलं गणधरगणनीयनखरकेसरकम् ॥ १ ॥
समर्थनार्थमुक्तार्थप्रपञ्चोक्तिस्तु विस्तरः ॥
अभिषेक्तुं पुरुं द्रष्टुमिन्द्र एकः क्षमो जिनम् ॥
यद्बाहवः सहस्रं यन्नेत्राण्यपि महोत्सवे ॥ २ ॥
तिङां सुपां परिज्ञानं सौशब्द्यं कथितं यथा ॥
च्युतसंस्कारहान्यर्थं तदिह स्वीकृतं पुनः ॥ ३ ॥

कर्णीना गणयान्ता च वादिना वाच्यिन्त्यपि ॥
यतः मागन्तमर्हाय गुरि पुटामगीयते ॥ ४ ॥
कविर्नुगनगान्दर्भो गणकः कृतिभेदकः ॥
वादी विनयवागूरिर्वांदी [illegible] अमरजनः ॥ ५ ॥
उपेन्द्रैः परिपाकः मा मोदिविग्नुरूपते यथा ॥
पञ्चद्रोर्द्धिगवो विंदः पुराक्ता भागा, गुणैर्भागतो ।
हेमाद्रेः प्रतिबिम्बने पुणाणाः स्वायम्भुवीणां, श्रु ह ॥
नागश्रीर्द्धि जग्वेविधांविभ्रमने विन्तामणौ दिग्वदे ।
जैनश्रीव्याकरणः दामनरधीयेव नवर्धी लिपीः ॥ ६ ॥
यदानि यत्र गुरुमन्ते अत्यमानविवर्ण्यैः ॥
उदाहता मता सा वागुपितार्थरदाले ॥ ७ ॥
यटद्वलिंगृ भार्गनी अत्याप्यवसायम् ॥
विनयद्गुणवधं निर्वात्याव्यानगायत्री ॥ ८ ॥
उद्दाता[illegible] गायत्र्यादिपंक्तया ॥
वासुदेवः पिनाक. योग., मेत्रानिलगुरुदन्ते यथा ॥
[illegible] च [illegible] परिहान [illegible] ॥ ९ ॥
[illegible] क्वचि [illegible] क्वचि [illegible] क्वचि ।
[illegible] क्वचि [illegible] क्वचि [illegible] क्वचि [illegible] ।
[illegible] क्वचि [illegible] क्वचि [illegible] क्वचि ।
[illegible] ॥ १० ॥
[illegible] ।
[illegible] ।
[illegible] ॥ ११ ॥
इति [illegible] ।
[illegible]
[illegible] ॥

त्यागो लोकानुरागो मतिरतिकुशलता सत्कलावेदिता च ।
स्थैर्यं शास्त्रार्थयुक्तिर्विनय इति च गुणा नेतृगाः स्यात्मने ॥ १२ ॥
नायकस्तद्गुणोपेतः स चतुर्धा प्रभाष्यते ॥
उदात्तललितौ शान्तोद्धतौ धीरविशेषितौ ॥ १३ ॥
दयालुरनहङ्कारः क्षमावानविकत्थनः ।
महासत्त्वोऽतिगम्भीरो धीरोदात्तः स्मृतो यथा ॥ १४ ॥
शान्त्यैच्छान्यिहितागमोऽपि नमयन्नाशां गजं श्रीजयः ।
त्यागश्रीकरुणः सुरेन्द्रहरिदाद्याश्रितव्यन्तरान् ॥
ध्यायन्नप्यनहंकृतिः सकलदिग्भूमीशपूज्योऽपि ह ।
श्रीपंचाल्यपराक्रमो न विकृतिं सर्वत्र सोऽगान्निर्भरः ॥ १५ ॥
कलासक्तः सुखी मन्त्रिसमर्पितनिजक्रियः ॥
भोगी मृदुरचिन्तो यः स धीरललितो यथा ॥ २१६ ॥
गवाक्षसंलम्बितपादयुग्म- । प्रवेदितालस्थितिरुद्धहर्म्ये ॥
चिक्रीड राजा परिरम्भचारु- । कटाक्षगीतादिभिरङ्गनाभिः ॥ १७
कलामार्दवसौभाग्यविलासी च शुचिः सुखी ॥
रसिकः सुप्रसन्नो यो धीरशान्तो मतो यथा ॥ १८ ॥
कान्तास्यचन्द्रनयनद्युतिनालजाल- ।
सम्पीयमानतनुभं पुरि पर्यटन्तम् ॥
सौधस्थिताऽपि वनिता नवकामदेव ।
बाहू प्रसारयति तं परिरब्धुकामा ॥ १९ ॥
चपलो वञ्चको दृप्तश्चण्डो मात्सर्यमण्डितः ॥
विकत्थनो ह्यसौ नेता मतो धीरोद्धतो यथा ॥ २२० ॥
अमेयस्योऽजनि राहुरप्यपि विधुः कार्श्येनरद्धन्द्वग. ।
सूर्यः शून्यपदं गतश्च रिपवः संश्रयते गह्वरे ॥

सर्वेऽप्यपि रसेषूक्ता नायकास्ते चतुर्विधाः ॥
प्रत्येकं तेषु शृङ्गारे चत्वारो भाषिता बुधैः ॥ २२ ॥
दक्षिणः शठधृष्टावनुकूलश्चेति भाषिताः ॥
दक्षिणो बहुसाम्यः स्याद्गूढविप्रीतिकृच्छठः ॥
व्यक्ताग्रा गतभीर्धृष्टस्त्वेकाधीनोऽनुकूलकः ॥ २३ ॥

बह्वीषु नायिकासु अवैषम्येण स्नेहानुवर्ती दक्षिणः ॥ नायिकामात्रज्ञाताऽप्रीतिकारी शठः। नखक्षतादिना व्यक्तापराधो धृष्टः ॥ नायिकायां एकस्यां विशेषानुरक्तोऽनुकूलः ॥

मत्क्रोडागूढवक्षसीतरवधूः स्वप्नेऽपि मास्त्वामिति ।
श्रीकान्ता सकलार्थसाधनपरो बाह्ये च धीरेन्दिरा ॥
प्रातश्चोद्यमुखे कृतादरतया जागर्ति सा देव्यपि ।
तत्रैवेच्छुरिति प्रबुध्य निधिपोऽप्याद्विविनाडीर्विधिः ॥ २४ ॥
कार्यानुपुरकिङ्किणीमणिरवं श्रुत्वाऽन्यकान्तागतं ।
गाढाश्लेषमहाश्लथीकृतभुजग्रन्थिः शठाद्यासि भोः ॥
साक्षाच्चन्मनसो गतं मम सखी यद्यागतस्त्वागता ।
त्वन्माधुर्यवचोभ्रमा मम पुरस्तां श्लाघते सादरात् ॥ २५ ॥
तस्याश्चाधरते रदक्षतमहामुद्राङ्कितं त्वाधरं ।
धूर्त च्छादयसे किमभिनमनव्याजेन मे रुद्भितः ॥
इत्युक्तेन मया क्वचास्ति तदिति व्यामार्ष्टुमिच्छावता ।
गाढाश्लिष्टतनुः स्मितविस्मृतवती तच्चर्मरामाश्रिता ॥ २६ ॥
सुखं त्वमसि चेदस्ति विधेन्द्रियमनुत्कटम् ॥
अन्याङ्गनाकटाक्षादीननिच्छोमम सुप्रिये ॥ २७ ॥
धीरोदात्तादिनेतॄणामिति भेदास्तु षोडश ॥
परमध्यावरत्वेन त्रित्वमेष्वेव भाषितम् ॥ २८ ॥
नायका भेदतस्त्वष्टचत्वारिंशदितीरिताः ॥
विदूषको विटः पीठमर्दो नेतृसहायकाः ॥ २९ ॥

नेतुर्विदूषको हासकारी चारुभसञ्जठः ॥
नायकस्वान्तरागानुकूलविद्यो विटो मतः ॥ ३३० ॥
मनागूनगुणो नेतुः कार्ये दक्षोऽन्तिमो मतः ॥
लुब्धधीरोद्धतस्तब्धाः पापिष्ठाः प्रतिनायकाः ॥ ३१ ॥
सत्वजा यौवने पुंसां शोभाद्या ह्यष्टधा गुणाः ॥
गाम्भीर्यं स्थैर्यमाधुर्ये तेजः शोभाविलासनम् ॥ ३२ ॥
औदार्यं ललितं चेति तेषां लक्षणमुच्यते ॥
गाम्भीर्यं या प्रभावेनाऽविकृतिः क्षोभणेऽपि च ॥
कार्यादचलनं स्थैर्यं विघ्ने महति सत्यपि ॥ ३३ ॥
माधुर्यं तर्कणं सूक्ष्मकलासङ्घयगोचरम् ॥
प्राणनाशेऽपि धिक्काराक्षमत्वं तेज उच्यते ॥ ३४ ॥
शोभाभां शौर्यदक्षत्वे स्पर्धा नीचैर्घृणाऽधिकैः ॥
विलासो सस्मितोक्तिस्सधैर्या गतिः प्रसन्नदृक् ॥ ३५ ॥
औदार्यं स्वपरेषु स्याद्दानाभ्युपगमाधिकम् ॥
ललितं मृदु शृङ्गाराकृती सहजचेष्टनम् ॥ ३६ ॥
स्वीयेतरा च सामान्या नायिका तद्गुणा त्रिधा ॥
सशीला सत्रपा स्वीया प्रगुणा च सती यथा ॥ ३७ ॥
श्रीदानतास्याऋजुचित्तवाणी । स्वशीलमाल्याश्रितहारयष्टिम् ॥
बभार वक्षस्युरुपट्टदेवी । लक्ष्मीमिव प्रेमकरी निधीशः ॥ ३८ ॥
अन्योढा कन्यका चेति मान्या तु द्विविधा मता ॥
सशृङ्गारमाऽन्योढा कन्यका नीरमा यथा ॥ ३९ ॥
इति स्वेष्टार्थसंवादे वनमाला स्मरातुरा ॥
दूत्या पत्यौ परोक्षे द्रागविशद्राजमन्दिरम् ॥ ३४० ॥
स्वाङ्के समारोप्य घनेन केन । कुमारि भाव्य वद चेति पृष्टे ॥
अधोमुखीभूय स्मितं तु रम्या । लिखेत्स्म पादाङ्गुलिभिर्भुवं सा ॥४१॥
सत्काराङ्कपाशाद्यैरनुरज्येव रञ्जयेत् ॥

दातारं नायकं वेश्या सा तु साधारणा यथा ॥ ४२ ॥

पद्मरागमणिजातरक्तिमा। स्फाटिकीव दृषदायतात्मिका ॥
जायते च गणिका यदा युना। येन रागसहिता तदैव च ॥४३॥

मुग्धा मध्या प्रगल्भेति स्वीया सा त्रिविधा मता ॥
रते वामाऽल्पक्रुन्मुग्धा नवयौवनमन्मथा ॥ ४४ ॥

नवांकुरोद्भिन्नकुचां लतांगीं। मुक्ताञ्चलोलालकपञ्चरीकाम् ॥
रतोररीकारमतिश्चुनां तां। बहिः परं तुष्टिमितोऽनुगृह्य ॥ ४५ ॥

मध्या गूढवयःकामा मोहितान्तरते यथा ॥
केशान्गृह्णति चुम्बति प्रतिलिसत्यास्फालयत्यादरा-।
द्वक्षो भ्रूलाटे करं रदनखं व्यापारयत्यात्मनः ॥
सन्धाने रतचाटुकोटिमतुले श्रीनायके भोः सखि।
यापींस्तत्र रतं व्यधामिरे मया ज्ञानं न किञ्चित्तदा ॥ ४६ ॥

अत्यन्तमुग्धवयःकामा लीनेव प्रियवक्षसि ॥
प्रगल्भा सुरतारम्भेऽप्यस्वाधीनमना यथा ॥ ४७ ॥

गाढाश्लेषमलीनस्तनविसजयुगोद्भिन्नरागोद्गमाढ्या।
सान्द्रस्नेहातिरेकप्रगलितविरणत्काञ्चिमुद्धोणिबन्धा ॥
मा माऽलं मेति दैन्यप्रलपितवदना किं मृता किं प्रसुप्ता।
काये किं सुप्रविष्टा मनसि सपुपिता वेति ॥ रेरमीति ॥ ४८ ॥

मध्या त्रेधा मता धीरा धीराधीरा तथेतरा ॥
सागसं भेदयेद्धीरा सोत्प्रासानृजुवाग्यथा ॥ ४९ ॥

केनव्यानवकण्टकैर्गलमुखं व्यापाटितं हन्त ॥ ॥
प्रस्वेदप्लुतमातपेन लपनं वातेन शीर्णाः कचा- ॥
यातायातपरिश्रमाद्भुरिदं क्लान्तं तवैवं त्वयि।
तावत्तिष्ठ न तिष्ठ मा विश गृहं धूत्यापरक्तात्मिका ॥ ५० ॥

धीराधीरा मता साश्रुवक्रसोत्प्रासवाग्यथा ॥
दयिते किं नाथ कान्ते जहिहि मयि रुषं रोषतः कि कृतं ते

ममस्नेहो दन्तदंशानि विपरीत कृतं किं त्वयाऽगो मयैव ॥
यदि चैवंगोऽसि त्वं किमिति रुदितमत्त्वं नु को मे प्रियोऽहं
नहि दासी मे मनस्त्व रुदितमहन ना त्वं चमूर्गाभिनेति ॥

गलदश्रुनादेन वक्रोगवचसा क्रुधा ॥
खेदयेत्सापराधं या स्याद्धीरा च सा यथा ॥ ५२ ॥

दन्तैःखण्डितनाथगमूनगम स्वेदच्युनास्यपुटि ।
गाढाश्लिष्टभुजोल्लासयुगच्यावन्यनाशक्तिकन् ॥
नेत्रैराश्रिनुमक्षमा वयमलं त्वं मुञ्च मुञ्चालि भोः ।
किं तेनाद्रियता च मा खलवरो यायातु यायातु मः ॥ ५३ ॥

प्रगल्भाऽपि त्रिधा मन्यावदेव परिभाषिता ॥
व्याजेनाथ्या रतं त्यक्त्वा सागमं खेदयेद्यथा ॥ ५४ ॥

कान्ताभ्यर्णस्थिता सा करधृतसुमनःकन्दुकानीतिदम्भा- ।
दाक्षेपं विक्षिपन्ती गलस्वल्पसितादीनि चालीजनेभ्यः ॥
ताम्बूलं तालवृन्तं मुकुरमपि मनागाऽऽनयन्तीत्युपायं ।
नीतेभ्यः कोपजालं मपल्लसकृत तं चानुगं खेदयन्ती ॥ ५५ ॥
दृष्ट्वा तं खण्डितेऽष्ठ कलहयति पुंश्चवा केशमहं नो ।
दत्ते गण्डं मदोष्ठं क्षिनगति न च नन्तुम्बितुं मुमुहुः ॥
नीवीविस्रमने वा क्षिनगति न तनु क्लिन्वनोऽप्यश्रहृष्टा ।
शिक्षां तन्वी स्वनेनु कुरुत इति महाकोप एषोऽत्र नान्यः ॥५६॥
धीराधीरा प्रगल्भादि. सोत्प्रासाऽनृजुवाग्यथा——
अन्योन्यस्मेरता च भ्रुकुटिविरचना दृष्टिपातः प्रमादो ।
गाढाश्लेषोऽपि मौनं भणितमनुनयो यत्र रोमाञ्चवृद्धिः ॥
स्नेहोद्रेकोऽपि कोपो भवति ननु सदा तस्य वैरस्यमासी- ।
त्प्रेम्णः पश्चाच्च पादान्तिक लुठसि तथाप्यस्ति मन्युः खलायाः ॥
अधीरा तु प्रगल्भादिस्तर्जयेत्ताडयेद्यथा ॥
कोपादायान्तमुष्णश्वसितदयितया बाहुपाशेन बद्ध्वा ।

वासागारं च नीत्वा परिजनपुरतः सूचयन्त्याऽपराधम् ॥
नानो भूयो दुरात्मन्निति मधुरगिरा संरुदत्या पदाभ्यां ।
मञ्जीरासिञ्जिताभ्यां हसति मुदमितस्ताडितो निह्नुतीद्धः ॥ ५८ ॥
मध्या तथा प्रगल्भा च भिदा ज्येष्ठाकनिष्ठयोः ॥
प्रत्येकं षड्विधा प्रोक्ता कामितोपकरी यथा ॥ ५९ ॥
कान्ते एकत्र सुस्थे त्वविदितचरमात्प्रेमलोऽभ्येत्य दृष्टे- ।
रस्या नेत्रेऽपिधायापिहितवरमहाकेलिदम्भेन चान्याम् ॥
ईषद्ग्रीवाग्रभङ्गः पुलकितमुतनु रोमहर्षं दधाना- ।
मन्तर्हासोल्लगण्डां तरलतरदृशं चुम्बति द्राक्च धूर्तः ॥ ६० ॥
अष्टावासामवस्थाः स्युः स्वाधीनपतिकादयः ॥
स्वाधीनपतिका वासकसज्जिका कलहान्तरा ॥ ६१ ॥
खण्डिता विप्रलब्धा तु तथा प्रोषितभर्तृका ॥
विरहोत्कण्ठिता चान्या तथान्या चाभिसारिका ॥ ६२ ॥
स्वाधीनपतिकाऽऽसन्नाऽऽयतनाथा मता यथा ॥
याऽलंकृता प्रियागत्या यथा वासकसज्जिका ॥ ६३ ॥
उरोजपीठेऽभमदेन तस्याः । कुतूहली यं मकरं लिलेख ॥
विभावयामास स भावयोनेः । स्थूलाग्रजाग्रन्मकरध्वजस्य ॥६४॥
काञ्चीनुनूपुरविसिञ्जितचित्तरम्या ।
गुञ्जद्द्विरेफमुखनीरजशोभमाना ॥
भास्वत्युदेष्यति मृणालनिभोरुहारा ।
कान्ते समेष्यति नभो नलिनीव तन्वी ॥ ६५ ॥
पश्चाद्गार्ता निरस्येशं कलहान्तरिता यथा ॥
विबुद्धागजचिह्नेशे खण्डितेर्ष्यावती यथा ॥ ६६ ॥
अनुनेतुमनाः कान्त परुषोक्त्या हतो गतः ॥
किमिन्दुरभसञ्च्छन्नो न संहरति कौमुदीम् ॥ ६७ ॥
ओष्ठं तद्दन्तदष्टं स्थगयसि करतः कीर्णकेशान्सुमोक्ष्या ।
तरुणीनोत्तुङ्गचञ्चत्कुचरचितमहाकुङ्कुमार्द्रं च वक्षः ॥
वस्त्रेणास्या नखाग्रैर्लिखितगलतटं गोपयस्यच्छहारैः ।
दिग्व्यापी स्त्रीसुभोगव्यतिकरजनितः केन गोप्योऽङ्गगन्धः ॥६

वञ्चिता समयायानाद्विप्रलब्धेतिना यथा ॥

आरक्ताक्षी प्रभाश्रीशबलितमहिमभ्रूरुपुत्रामचापा ।
प्रावृट्कालोपमा सा रतनरचरिता शिक्षिकाऽमूकलानाम् ॥ ८८ ॥

माधुर्यं रम्यताऽश्लाघ्यवस्तुयोगेऽपि तद्यथा ॥

वल्काम्बरेणापि च चारुगुञ्जा- । फलोरुहारेण विभूषिताऽपि ॥
वनेचरी कुम्भकुचा नितम्ब- । भारेमयाना निरुणद्धि पान्थम् ॥८९

चलनेनाहतं चित्तवृत्तं धैर्यं भवेद्यथा ॥

निशि निशि शशिबिम्बो जाज्वलीतु स्वागात्र- ।
ज्वरपरिचितहारो दन्दहीतु मतस्सः ॥
अतनुरपि निहन्तु प्राग्यमेवं च भर्तुः ।
पितुरपि मम मातुः श्लाघ्यता नन्वहाप्या ॥ ९० ॥

महदायासेऽपि चौदार्यं विनयोत्कर्षता यथा ॥

प्रस्वेदबिन्दुवदनां श्लथकेशबन्धां ।
क्रीडारुणाक्षियुगलां रदपीडितोष्ठाम् ॥
कण्ठस्तनादिनखरक्षतचन्द्रखण्डां ।
तुष्टो विलोक्य निधिपो विनयान्वितां ताम् ॥ ९१ ॥

चेष्टितैर्मधुरैर्लीला प्रियानुकरणं यथा ॥

उषितं शयितं हसितं रमितं । भ्रमितं सुगतं सुकृतम् ॥
प्रियगं रमणीव नटी सरसा । वरवासगृहेऽनुचकार वरा ॥ ९२ ॥

चेष्टातिशयनं गात्रे विलापः प्रियवीक्षणात् ॥

स्फुटत्केशपद्मा सितोत्केसराढ्या । लसद्वाग्द्विरेफोरुझङ्काररम्या ॥
अपास्तोरुधैर्या मरालोरुयाना । स्मर पद्मिनी स्म बभौ व्यञ्जयन्ती ॥

मसृणं सुकुमारोऽङ्गविक्षेपो ललितं यथा ॥

पुष्पाञ्जलिं स्फुरदपाङ्गमुपक्षिपन्ती । श्रीहस्तपल्लवविवर्तनतो लपन्ती ॥
पादारुणाम्बुजयुगं भुवि विक्षिपन्ती । भ्रूभङ्गमादिवयसा नृपमालुलोके ॥

शुगरुद्रोषादिसांकर्यं यथा तु किलकिञ्चितम् ॥

द्युते भर्त्रा जिते प्यायितवसनकुचादर्शनेनास्य चित्तं ।

भ्रान्तं कृत्वा विजिग्ये पुनरपि विजिते सावधानेन भर्त्रा ॥
कोपारक्ताक्षिवीक्षा भ्रमितपतिमना जेतुकामा लतांगी।
तेनैवास्मिन्जिते सा रुदितनतमुखी तुष्टिगाऽस्यं सुलोके ॥ ९५ ॥

सम्भ्रमाद्विभ्रमो भूषाव्यत्ययः पुरुषागमे ॥

निशम्य कान्तं बहिरागतं तं। मञ्जीरयुग्मं करयोश्च कार्यम् ॥
कण्ठे च हारं सुघटीतटे सा। भालेऽञ्जनं दृक्तिलकं करोति ॥ ९६

केलाष्टान्तरालिङ्गमुखे कुट्टिमितं यथा ॥

आलिंगन्तं पटकुचयुगं वक्षसीवातिलीनं ॥
चुम्बन्तं तं भ्रुकुटिरुचिरा वारयन्ती कराभ्याम् ॥
अन्तस्तुष्टा बहिरलसया मान्मथं व्यञ्जयन्ती।
एवं मावं सा भवति पुलकैः फुल्लराजीवनेत्रा ॥ ९७ ॥
मतिस्वप्नेन चिन्तादावपि मोट्टायितं यथा ॥
सांगभंगादि या नाथं स्मृत्वा मोट्टायितं यथा ॥ ९८ ॥
चारचित्तगतं नाथं दृष्ट्वा राजीवलोचना ॥
मृदुसल्लापिनी व्रीडाननास्या रागिणी स्थिता ॥ ९९ ॥
मदनदवरामाय प्रस्तुतायां कथायां।
तव नृपवर सख्याजृम्भितैर्लोलनेत्रा ॥
कठिणवरकुचाग्रोन्मेषमुत्कीर्णयन्ती।
वलयितमृदुमारोद्यबाहुव्वलाऽस्मात् ॥ १०० ॥

गर्वावेशात्तु बिब्बोक कथितोऽनादरो यथा ॥

ऊरुश्रोणिकुचान्स्पृशन्व्यपनयँस्तत्पातचीनांशुकम्।
गृह्यास्ते तिलकालका इति पदालीनातिलोलागुलि ॥
भ्रूभङ्गोरुतरङ्गनर्तितदृशा दृष्टोऽस्यवशं वधू।
गर्वाविरागविगया नवरतेनाहं कृतार्थीकृत ॥ १ ॥

कार्ये स्वरूपोऽप्यलङ्कारो विच्छित्तिम्नुपिकृपदा ॥

तस्या अभ्यङ्गविधे मकरं कपोले। तदोअङ्गोन्तरितगन्धमुद्भुत ॥

इत्यलङ्कार[illegible] । [illegible] ।
यतोऽत्र [illegible] । यथा ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ ३ ॥
[illegible] ॥
[illegible] ॥ ४ ॥
[illegible] ॥
[illegible]चिन्तामणिनिरूपिताः ॥ ५ ॥
[illegible] तत्र तत्र सा ॥
संशोध्य गृह्यतां सद्भिः [illegible] ॥ ६ ॥

इत्यलङ्कारचिन्तामणौ रसादिनिरूपणो नाम पञ्चमः परिच्छेदः ॥

जगत्प्रपूज्यविन्ध्याग्रे इक्ष्वाकुरत्ननन्दनम् ॥
सुरासुरादिवन्द्यांघ्रिदोर्बलीशं नमाम्यहम् ॥ १ ॥
राजाधिराजचामुण्डराजा निर्मितपत्तने ॥
तत्पुरे स्थितवता चारुकीर्तिपण्डितयतिना ॥ २ ॥
क्षयसंवत्सरे मासे शुक्ले च [illegible] ॥
आश्विने च चतुर्दश्यां पुण्यायां गुरुवासरे ॥ ३ ॥
एतद्दिनेऽप्यलङ्कारचिन्तामणिसनाह्वयम् ॥
सम्यक्पठित्वा ग्रन्थादि संपूर्णं शुभमस्तु ॥ ४ ॥
काश्यपे नाभिगोत्रे च सूत्रे चाद्रानन्नाम्नि च ॥
प्रथमानुयोगशाखायां वृषभप्रवरेऽपि च ॥ ५ ॥
एतद्वंशेषु जातोऽहं—


एतावत्पर्यंतमेव प्राचीनपुस्तके लभ्यते । इत उत्तरं एतच्छ्लोकपूर्तिपर्यन्तमेव स्यादिति भाति इति शुभम् ॥

शुद्धिपत्रम् ।

पृष्ठम्	पंक्ति	अशुद्धम्	शुद्धम्
१	५	शान्तयेऽस्तु	शान्तयेऽस्तु
२	१	स्फुरित-	स्फुरति-
३	१५	भूभृत्-	भूभृत-
३	,,	तनुत्रामात्य-	तनुत्रामात्य-
३	२४	सम्पयुक्त	सम्प्रयुक्त
४	२१	पुष्ठ	पुष्ठ
७	२१	अञ्जालि-	अञ्जली-
९	२०	शत्रु:स्त	शत्रुन्ते
१२	५	तोऽभरस्मृत्	तोऽस्मृतम्
१२	२१	पृष्ठं	पृष्ठं
१६	१७	जातिः॥	जातिः॥
२०	७	पादपात्र	पादमात्र
२४	४	पन्महीन	पन्महीन
,,	१५	ध्वनिः समलता-	ध्वनिः समलता
३२	२५	कैवल्येनागिलार्थवृक् ॥	केनाखिलार्थदृक् ॥
४१	१८	अनन्तान्त-	अनान्त-
४१	२४	कक्ष मानन-	कक्षमानन-
४९	२	प्रासिर्वस्य	प्रासिर्यस्य
,,	१३	विरा	गिरा
५०	९	आरोप-	आरोप-
,,	१६	अर्थसाम्येन च	अर्थसाम्ये न च
५५	२६	रूपकादि	रूपकादि
६३	७	कविग्रमत	कविग्रामत
,,	१०	देवेन्द्र स्व	देवेन्द्रस्व
६५	२४	तनि थकिण	तविथकिण
६६	२४	थाता	त्रिता
६७	९	रूपकादिद	रूपकमिद
७२	८	न्वन्दा रूपक दर्प	नन्दि-रूपकन्दर्प
,,	११	शतमन्य	शतमन्यु
३	३	इसि	इसिः

शुद्धिपत्रम् ।

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
७१	१६	पृथाङ्गा	पृष्ठाङ्गा
७८	२०	मैत्री वामा-	मैत्रीमभा-
७९	८	मीरता	मरिता
८५	२०	वंशातर	वशान्तर
८७	१३	गमनान	गमनात्
८८	६	पृष्ठवते	पृष्टवते
८९	२२	विशेण	विशेषेण
९४	१७	स्वकोप–शरीष	सकोप-शरीष
९५	८	साधनेन	साधनेन
१०४	८	स्वेदोकर्षण	स्वेदोत्कर्षण
११४	१	प्रसवति जनता दुर्जुगु-	प्रवसति जनतादुर्जुगुप्स्यथ
१२०	१४	ररिसनायां	ररिसेनाया
१२५	१५	तथा समर्थ	नथाऽसमर्थ
१२८	१५	कर्मकारस्या	कर्मकारकस्या
१२९	२५	काता विध्यारण्य	कान्ता विन्ध्यारण्य
१३१	७	सेर्ष्या	सेर्ष्या



पृ. ० श्लोकः ८१ अष्टदलपद्मबन्धः



पृष्ठे ९ श्लोकः ८१ गोमूत्रिकाबन्धः ॥







पृष्ठं २२ पङ्क्तिः १८ पद्मबन्धः




पृष्ठम् २३ पङ्क्तिः २ गोमूत्रिकाबन्धः ॥

ग	अ	त	र	बः	ग	ज	द	म	छः	ग	ज	स	द	यः
ग	ज	न	व	ब·	गं	न	द	म	म्र.	ग	ज	स	द	यः


पृष्ठम् २३ पङ्क्तिः २४ गोमूत्रिकाबन्धः ॥

त	ध्रां	ष	न्ता	म	ने	ङ	म
जी	म	न	व	न्म	ह्र	हा	नं
भा	ङॅ	ख	लं	ज	में	अ	म

चित्रम् १७ श्लोकः २१ नागपाशबन्धः॥



चित्रम् १८ श्लोकः ५८ मुरजबन्धः॥





चित्रम् १४ श्लोकः १५० अनंतरपादमुरजबन्धः॥

आभिषिक्तः सुरै लोकैः ।
भिभि भक्ति भरै र्वै कैः ॥
सानुपूज्य मयी रोगः ।
स्वं सुपूज्यः क्षमी दशः ॥१॥

चित्रम् १६ श्लोकः ४८ गोमूत्रिकाबन्धः॥



चित्रम् १७ श्लोकः १५१ कृतपादमुरजबन्धः॥

कनुतामकलं लमं धीमता मर्त्य मधमं ॥
धीमतिह्रिमत मर्त्ये मं सामकामं नम लमं ॥


चित्रम् १८ श्लोकः १५२ मनन्तरपादमुरजबन्धः॥

नमोस्तुम मतातीत ।
ममोत्तम मतामृत ॥
मताभित मते नात ।
मतातीत मते नित ॥


वृत्तम् ३५ श्लोकः ५३ गोमूत्रिकाबन्धः ॥



वृत्तम् ३५ श्लोकः ५३ अन्तरितशृङ्खलाबन्धः ॥



वृत्तम् ३५ श्लोकः ५३ षोडशदलपद्मबन्धः ॥



वृत्तम् ३६ श्लोकः ५४ नकारान्तरेण मुरजबन्धः ॥

दि व्यै र्ध्वं नि मित त्वन न ।
चामरै र्दुदु भिः स्वनैः ॥
दि व्यै र्वि नि मित स्तोत्र ।
श्री मदर्द्ह रि भिर्जनैः ॥

वृत्तम् ३६ श्लोकः ५५ अर्धभ्रमबन्धः ॥

थि	था	वे	भि	त	वे	तर	स्थी
या	नु	पा	या	न्व	त	न	ताः
पे	का	ण	या	त	पा	त	धे
भि	पा	मा	ना	न	त	न्व	त

वृत्तम् ४० श्लोकः ५६ सर्वतोभद्रबन्धः ॥


क	त	का	[illegible]	[illegible]	बा	ह	पा
री	रा	म:	रा	के	मा	रे	त
का	मा	ना	भ	म	बा	म:	पा
र	हा	न	र्णे	र्णे	म	रा	र
र	हा	न	र्ण	र्ण	म	रा	र
रा	मा	ना	म	म	ना	मा	रो
त	हा	मा	रा	रा	मा	री	तो
पा	ह	का	र	र	का	ह	पा

पृष्ठम् ४१ श्लोकः ६४ चक्रयंत्र ॥

पृष्ठम् ४१ श्लोकः ६५ दर्पणाकार यं ॥


पृष्ठम् ४१ श्लोक ६६ ताम्रकुंभकम्॥

पृष्ठम् ४२ श्लोकः ७१ निरमात्रबन्धः ॥




पृष्ठम् ४२ श्लोकः ७१ ब्रह्मदीपिकाबन्धः ॥





पृष्ठ ४३ श्लोकः ७४ पादुकाबन्ध


वृत्तम् ४२ श्लोकः ७८ षडरं चक्रम् ॥




वृत्तं ४२ श्लो. ७९ भृङ्गारबन्धः ॥



पृष्ठम् ५५ श्लोकः८३ क्रमदीपकबन्धः॥



पृष्ठम् ५५ श्लोकः८४ छत्रबन्धः



वृत्तम् ४४ श्लोकः८५ हारबन्धः॥

